वात्स्यायन काम सूत्र व्याख्या

कन्दर्पचूडामणिः

४०७

प्रज्ञाते

८०६

५07

वात्सायन कामसूत्र व्याख्या

A. वीरभद्रदेव: कन्दर्पचूडामणि

F. 76

अलंकार शास्त्र

[illegible]

22.12.92

७२

४८७ कंदर्पचूडामणी

१

कश्यतो
५ क

श्रीरामचंद्राय नमः॥ अरुणापि दक्षकोपाद्भक्त्यनुरक्तेषु सानुरागेव॥ कल्याणाय जग
त्सा दृष्टिः श्रीकालभैरवस्यास्तु॥ प्रणमत रहसि सतृष्णं कृष्णं स्मरशास्त्रपारगं विज्ञाः॥ पीयू
षादपि मधुरेऽधरबिंबे गोपकन्यानां॥ मंत्री वसंतसमयो यस्य च राजीवमोचना राज्यं॥ वाहा म
लयसमीराः पंचशरो सौ नृपो जयति॥ ॥वंशः कंसद्विष इव जयति वघेलस्य भुजां मान्यः॥ ज २४
अजघन्योस्ति जगत्यां यस्मान्नभूपालः॥ ॥प्रादुर्बभूव वंशे तत्र श्रीशालवाहनो नृपतिः॥ इंदु
मरंदबिंदुर्यस्य यशःपुंडरीकस्य॥ ॥भिन्नस्य शीतमहसः सुचिरं लक्ष्मेति मन्यते लोकः॥ विधु
रैर्यदीयविधुरैर्निशि निहतैर्भास्करभ्रांत्या॥ ॥प्रादुर्बभूव तस्माद्वीरः श्रीवीरसिंहाख्यः॥ यस्य य
शोंबुजकोशः स्फारामकरंदबिंदवस्ताराः॥ ॥यस्य करेणकरादिह समरे तिपुसूपचारणाधिपतेः॥
दानांबुसंगशोभा सौतिशयाकुंठितामुडिति॥८॥ वीरस्तदंगजन्मा प्रतिभरपूतनात मस्विनी भानुः॥

श्रीवीरभानुनामाधिपतिरभूद्भुजाज्जगति॥९॥श्रुत्वापि वीरभानोर्दानकथा नेह जातलज्जानि॥वृक्षौ
पल्लपशुभावाद्दैवततरूधेनुरत्नानि॥१०॥कामादप्यभि[illegible]मो भीमादपि बाहुशालिनोमान्यः॥कर्णा
दपि च वदान्यो जयति सुतोरामचंद्रोऽस्य॥११॥श्रीरामेणारब्धे दाने गजवाजिनोर्मुखैक्येन॥वक्रान
नोगणपतिर्भ्यासाभूत्तुंबुरः खचरः॥१२॥राजोचितगुणसीमा भीमावरजादिहाधिको धनुषि॥तनये
विनयसमुद्रो जयतितरां वीरभद्रोऽस्य॥१३॥विद्यायांसुरगुरुरि[illegible]व सौंदर्ये पंचबाणतोप्यधिकः॥
दाने कल्पतरोरयमुपमेयस्तेन केनेह॥१४॥चूडामणिं स्मृतिभुवो ग्रंथं श्रीपंचबाणशास्त्रे सौ॥वा
त्स्यायनानुरूध्यं कुरुते कुतकात्तहृद्वृत्तिः॥१५॥कामागमानुसारिणि मनसिजचूडामणाविह ग्रंथे॥
अधिकरणे प्रथमेस्मिन्प्रथमोध्यायो विधीयते प्रकटः॥१६॥लक्षं त्रिवर्गशासनेमध्यायानां प्र
जापतिश्चक्रे॥सस्वाः प्रजास्समस्तास्तासां स्थितये समस्तस्य॥१७॥एकं देशं चक्रे पृथगिह ध

रा

र्मधिकारिकं मतिमान् ॥ अर्थाधिकारिकं गुरुरमरपतेः कामसूत्रं तु ॥१८॥ नंद्यध्यायसहस्रं
कृतवान् संक्षेपमस्य चार्थेन ॥ पंचभिरध्यायशतैरौद्दालकिराददकृत ॥१९॥ बाभ्रव्यः पांचा
२ लस्साधारणसांप्रयोगिकप्रमुखैः ॥ संचिक्षेप तदर्थनिधिकरणैस्सप्तभिर्मतिमान् ॥२०॥ अ
ध्यर्थं ज्ञातमस्मिन्नध्यायानां प्रकीर्तितं तस्मात् ॥ षष्ठं दत्तकनामा वैशिकमेकं पृथक् चक्रे ॥२१॥
स्यार्द्ध भार्याधिकारिकं किल गोनर्दीयः स्मरागमाचार्यः । घोटकमुखः पृथक् कन्यासंयुक्तकं कृतवान् ॥२२॥
चारायणः प्रसंसाधारणमेव केवलं कृतवान् । चक्रे सुवर्णनाभः सांयोगिकमेवभेदेन ॥२३॥ औपनि
षदिकं चक्रे कुचुमारो मारदर्शने स्पष्टम् । संग्राहे पारदारिकमादरतो गोणिकापुत्रः ॥२४॥ एवं उद्दशत
कृतयः प्रोत्सन्नास्तत्र किमपि किंचित्रं । सम्यग्ज्ञानविरहितो न हि लोकः सज्जते क्वापि ॥२५॥ बा
भ्रव्यस्य कृतादपि न ज्ञानं कामतंत्रतत्त्वस्य ॥ महदिदमिति नाध्येतुं यस्माच्छक्यं नृणामेतत् ॥२६॥
एवं स्मरागमीय्यं मत्वोच्छेदं जगद्धिते युक्तः । वात्स्यायनः प्रचक्रे सूत्रं कामस्य संक्षिप्य ॥२७॥

महादुरधिगमं तद्दृष्ट्वा महतां च ताः कृतीस्सुकृती ॥ श्रीवीरभद्रदेवः सोद्योगः कामशास्त्रे-
सौ ॥२८॥ वात्स्यायनानुरुध्यानर्थानिह पुष्पधन्वनोभिमतान् ॥ श्रीवीरभद्रमतिमानार्यावृत्ते-
न संतनुते ॥२९॥ अधिकरणे प्रथमेस्मिञ्छास्त्रे साधारणाह्वये पंच ॥ अध्यायाः परिदिष्टाः शास्त्रो-
दित संग्रहः प्रथमः ॥३०॥ तदनु त्रिवर्गसिद्धिर्विद्योद्देशास्ततः परं तस्मात् ॥ वृत्तं नागरिका-
णां दूतीकर्मविमर्शनं पश्चात् ॥३१॥ अधिकरणांतरविषयास्त्वेवं ध्यायाश्च संख्यया सहि-
ताः ज्ञेयाः प्रत्यधिकरणं नेहातस्ते निरूप्यंते ॥३२॥ श्रीवीरभद्रकृतिना शास्त्रेऽसमबाणशासना-
नुसृते। साधारणेधिकरणे प्रथमोध्यायः कृतस्सांगः ॥३३॥ ॥ श्रीवीरभद्रकृतिना मनसिजचूडा- तीयो ३
मणाविह ग्रंथे। क्रियतेध्यायः प्रकरः प्रथमाधिकृतिद्वितीयोसौ ॥१॥ अर्थान्विद्यादीनिह बा-
ल्ये सेवेत यौवने कामं। तदुपरि धर्ममोक्षं समयविभागं त्रिवर्गस्य ॥२॥ अनपेक्ष्यैव च समयाना-
युर्नियमानवेक्ष्य याविबुधः। अन्योन्यानभिघेतं सेवेतार्थादिकान्वर्गान् ॥३॥ प्राग्विद्याभ्यस-

नादिह संतनुया कामसेवनं नैव। मन्वादिभिरभियुक्तै विहितं तद्ब्रह्मचर्येण॥४॥ केवलकामवश
हे प्रक्षीणार्थो न चानुया कामं। धर्मं चेति तदर्जुनरक्षणनिरतो भवेल्लोकः॥५॥ धर्मो नाचरणे ख
३ लु कामैरर्थैः क्व वास्ति संयोगः। कामकलानाचरणे वैयर्थ्यं स्यात्तयोरेव॥६॥ सेवेतास्मात्रितयं नै
वाभिभवैत्रितेषु कस्यापि। धर्मक्रियाल्पतायाः शूद्राणां गौरवं कामे॥७॥ राज्यस्यार्थवशत्वादर्थ
3 प्राधान्यमाचरेद्राजा। इति वात्स्यायनहृदयं नन्वर्थो राज्ञ एवेति॥८॥ यागादयोऽदृष्टतया लौकिक
मानस्य गोचरा नैव। तस्य प्रवर्त्तनं यद्धर्मो सौ कथ्यते लोकैः॥९॥ मांसादिभक्षणानां दृष्टार्थानां नि
वृत्तिरपि शास्त्रात्। धर्मः कथिता विदुषा बोधस्तस्य श्रुतिप्रभृतेः॥१०॥ न च संदिग्धफलत्वादारंभो
नैव यज्ञदानादेः। अभिचारादिवदेषां श्रुतिमूलत्वात्फलावधृतेः॥११॥ विद्याभूम्यादीनामर्जनमेत
स्य वर्धनं चार्थः। वात्स्यायनेन कथितं तस्य ज्ञानं वणिक्प्रभृतेः॥१२॥ अर्थः कामाधीनः किमि
हत्तेनेति केचनाचार्याः। आवश्यकी प्रवृत्तिः पुरुषस्यार्थार्थमित्यन्ये॥१३॥ श्रोत्रादीनाम

र्थे स्वे स्वे यास्युः प्रवृत्तयस्सरसाः। तां वात्स्यायनमुनिना कामे सामान्यतः कथिताः॥१४॥ स्पर्शा-
नुभवप्रभवोयं पुरुषार्थो विशिष्यतेन्यस्मात्। कामः स तु प्रधानं मदनोदय इध्यमाम्नातं॥१५॥ न
श्रीमल्लक्ष्मणदेवः कथयति तत्रैव तं च वैशिष्ट्यं। यत्रो भाव पि भोग्यौ भोक्तारौ चैव निर्दिष्टौ॥१६॥ सुख-
महवस्त्रादिभवं भोक्तुः पुरुषस्य केवलं भवति। आयामनं जनानामत्र तु युगपद्द्वयोः प्रथितं॥१७॥ क-
थितं लक्षणमन्यैर्यातिदं बाललालनाचरणे॥ पितुरिव तत्रानंदो भवति न किं लालनीयस्य॥१८॥
लीलायामिह यस्यां भवति तरां पुष्पधन्वनोनुसृतिः। से ह निगदिता कामो मतमेतद्वीरभद्रस्य॥१९॥
द[illegible]ष्ट्वा दशवदनादेः कामासक्त्या तथा महाऽनिष्टं। तादृशमेव न कुर्यान्न नु कामं नाचरेदेव॥२०॥ त-
त्प्रतिपत्तौ हेतुर्मनसिजसूत्रं च नागरासंगः॥ समवायेहनयोरिह पूर्वो ज्ञाने गरिष्ठस्स्यात्॥२१॥ धर्मे
भवं तु विद्या येन विना तान जायते बोधः॥ सं तु तथार्थे हि तोरस्यो द्बोधो यतः शास्त्रात्॥२२॥ कामे-
तु तिर्यगादे त्वशास्त्र कथं तावबोधविधुरस्य॥ भवति यथा हृतिरेवं स्यादन्येषां स्वतस्सिध्या॥२३॥

तस्मान्नशास्त्रहृद्यंकामोखिललोककाम्यमानेपि॥इतिकेचिदाहुराचार्याः नैतद्वात्स्यायनोमनुते॥२४॥
परतंत्रापरयुक्तानिरूपायासाधुसंप्रयोगस्य॥रतिरेतत्प्रतिपत्तिश्शास्त्रादीनायतोभिमता॥२५॥प
४ शुपुत्वनाद्वत्तास्त्रीणामास्तामपार्थकंशास्त्रं॥ऋतुकालावगतिःखलुशास्त्रादेवस्मरानुगुणा॥२६॥
यदिशास्त्राभिमतानांबोध्यानैवास्त्युपायजालानां॥नेहसुखायसमर्थःसम्यक्कोतोपिकांतायाः॥२७॥
भवतुचबीजविसर्गःशास्त्रोपायंविनैवकेषांचित्॥आनंदस्यविशेषोभवतिपुनस्संप्रयोगेन॥२८॥
श्रीवीरभद्रकृतिनाशास्त्रेस्मरबाणशासनानुसृते॥साधारणेधिकरणेरचितोध्यायोद्वितीयोसौ
॥२९॥ ॥परिखावृतिभुजवैभवभग्नप्रतिभूपवैभवेनेह॥विशदःक्रियतेऽध्यायःप्रथमाधिकृते=
स्तृतीयोसौ॥१॥संहितान्येशाग्रंथैःपुरुषोधीयीतकामसूत्राणि॥विद्यानामनुपघ्नन्कालान्
धर्मस्यचार्थस्य॥२॥प्राग्योव्वणाच्चयुवतिःप्रत्तासापत्युराशयादेवं॥स्त्रीभिःशास्त्राग्रहणा=

देतन्मिथ्येति केप्याहुः ॥३॥ तासां प्रयोगनिरतिं महाशास्त्रेण तस्य बोधं च ॥ तन्मूलं वात्स्यायन आह सं-
शास्त्रहृत्सानि ॥४॥ साक्षात्परं परावाशास्त्रं मूलं प्रयोगयोगस्य ॥ अमतव्याकरणादौ दुर्ज्ञेया स्साधुशब्दा-
द्याः ॥५॥ संत्यपि च शास्त्रसिध्ये बोधे निपुणाशयास्सुताराज्ञां ॥ तस्मादन्यासाम पियुक्तः शास्त्रग्रहस्त्री-
णां ॥६॥ चातुःषष्टिकयोगा नैकाकिन्यभ्यसेद्रहस्येषां आचार्याः पुनरस्या विश्वासाद्धूध्यदास्याद्याः ॥७॥
गीतानि नृत्यवाद्ये सालेख्यानीह चित्रकर्माणि ॥ दशनवसनांगरागामाल्यग्रंथने विशेषाश्च ॥८॥ ने-
पथ्यसंप्रयोगाः युक्ति तथेंद्रजालस्य ॥ पुष्पास्तरकोरचनाशयने मणिभूमिका मैकर्म ॥९॥ भक्ष्य-
विकारावरणं रत्नादीनां परिक्षणं तद्वत् ॥ एतास्तदंगविद्या ज्ञेया चान्यास्तथा मूलात् ॥१०॥ विस्तरभयान्न
कथितास्सर्वा इह वीरभद्रदेवेन ॥ चतुरधिकाष्टिक व्याख्या वात्स्यायनसूत्रतो ज्ञेयाः ॥११॥ अबलाः कला-
सुकुशलाः कुशलाः कुलटास्त्वभाद्विधा पुरुषाः ॥ सार्थकामयुमर्थं निरवग्रहमेव सेवंते ॥१२॥ श्रीवीरभ-
द्रकृतिना शास्त्रेऽस्मिन् बाणशासनानुसृते ॥ साधारणेधिकरणे रचितोध्यायस्तृतीयोसौ ॥१३॥ ॥अग्रे

ष्व निरर्गलोद्धृत्यदोर्दंडयविध्वस्तवैरिदर्पेण॥ आरभ्यते चतुर्थोऽध्यायः कामागमस्यासौ॥१॥ स्वस्वोचि
तैरुपायैर्विद्यावानाद्यसंपदं पुरुषः॥ वर्णं शक्रमागतां वाद्येधावास्या द्रुह्स्थो सौ॥२॥ विप्रः प्रतिग्रहर्थाः
५ राजा जयजानसंपदां पात्रं॥ क्रयविक्रयेणवैश्यः शूद्रो निर्वेशतोधनिकः॥३॥ अधिगम्यं गार्हस्थ्यं द
त्तं वर्त्तेन नागरानुगतं॥ नगरादावुपरचयेद्देवगृहं शोभनं स्वस्य॥४॥ सतिसंभवे विरचयत्सुधया सुधये
वशुध्धयाश्चेतं॥ मंदिरमस्यानंतरमुद्यानं कारयेद्दचिरं॥५॥ विलसन्मरंदतुंदिलमधुपरवोन्निद्रमन्म
थोल्लासं॥ लीलाकुलकोकिलकलनिस्वनवर्धितानंदं॥६॥ कुर्यात्क्राममपिवाजीकोकद्वंद्वस्फुरत्तनारं
म्यो॥ मंदानिलचलवीचिचंचलकमलोल्लसन्नयनं॥७॥ परिपूरितविषमाशुगतूणीराः पुष्पसंपत्
दापरया॥ रचयेदस्यास्तरमुखिमंटपविधयेलताविततां॥८॥ वापीमध्येमंडपमुचितं ग्रीष्मोपयोगिली
लायां॥ चरयेद्धरितोहिमितंशीकरपातच्छरैः पवनैः॥९॥ वासभवनदक्षिणमुविमुक्ताफलजालवल्लु
कल्लोला॥ उत्फुल्लफुल्लनिकरापुष्करिर्णीकांक्षिताकापि॥१०॥ ज्वलदुज्वलप्रदीपैः कालागरुधूपधूस

माल्यैकैः॥ वासगृहं रचयेदिह रुचिरं कर्पूरपुष्पाद्यैः॥११॥ वासगृहस्य च मध्ये विततवितानोपशोभिते च
देशे॥ शय्या रुचिरास्तरणा करणीया तोषदा मनसः॥१२॥ अन्यैरप्युपकरणैस्तशीतलजलपर्णपूग
संभारैः॥ संभावयेद्गृहं तन्मन्मथमनसः प्रमोदाय॥१३॥ उद्दीपनं स्मृतिभुवो यद्यद्यद्वा स्वरंजने शक्तं॥
तत्तत्सर्वं रचयेत् किं बहुनाभाषितेनेह॥१४॥ शयनीयस्य च भागे रचयेत्सिंहासनस्थलं शिरसः॥ तस्मि
न्नेव च भागे रचनीया वेदिका श्लक्ष्णा॥१५॥ इत्थं कामानुगुणं वामाहृदयस्य चानुकूल्येन॥ रचये
न्निवासभवनं संनिधिविलसद्वनोपवनं॥१६॥ कुर्यात्सदंतकाष्ठाः प्रातरिहोत्थाय तत्प निपतिता॥ अ
नुलेपनं सधूपं किंयदादद्यात्तथा माल्यं॥१७॥ सालक्तकादि रूदयन्मुखवासो वीक्ष्य दर्पणे वदनं॥ कुर्
यात्कार्यमतंद्रो नित्यसंध्यास्नानादिकानियताः॥१८॥ प्रातः क्रियाः क्रियाज्ञैरुदिता दश चात्र भेदतो विदि
ताः॥ पक्षेऽह्नि नेह्नि नेनूनास्ताः स्संतु कामेन॥१९॥ नस्या संहृतकक्षः स्वेदस्स्रुततं भवेत्तथा भूयान्
पूर्वापरांगयोरिह भोजनमुक्तं बाह्व ॥२०॥ चारायणस्तु कथयति सायं समयेपि भोजनं प्रथितं॥ ह

६

तमध्यंदिनदृसो भुंजीत प्रेयसीप्रहीतं ॥२१॥ शुकशारिकाप्रलापनमथयुध्धंमेषकुक्कुटप्रभृतेः ॥ अन्या
श्चापि च निचयेत्क्रीडाः कलयाय यथायोगं ॥२२॥ विटपीठमर्दनयतान्व्यापारास्तान्विदूषकस्याथ ॥ दिव
सेशेष्याच तथास्यादपराह्णे विहारोयं ॥२३॥ स्यादयमुचितो गोष्ठ्यै विरचितसम्पद्वप्रसाधनस्यास्य ॥ त
तदनंतरकर्त्तव्यं वात्स्यायनभाषितं कलये ॥२४॥ संगीतकं प्रदोषे प्राखेतस्य प्रसाधिते भवने ॥ अभिसा
रिकाप्रतीक्षणातीक्षणमाप्तसहायः सुखं रचयेत् ॥२५॥ प्रेषणमिह दूतीनामथवा स्वयं नायको गच्छे
त्तत्स्यास्सविधे नुगतानानोपायैर्वशीकार्या ॥२६॥ अधिदुर्दिनमभिसरणे निरतानां नष्टभूषणानां न
तु ॥ स्वयमारचयेन्मंडनमथवामित्रेणकारयेदुचितं ॥२७॥ इति वीरभद्रकृतिनाख्याताहोरात्रस
सताते न ॥ सांप्रतमभिधीयंते संभूयक्रीडितानीह ॥२८॥ व्यसनोत्सवगुरुपूजायात्राकरणं च दैवतप्रभृतेः ॥
संभ्रमसाक्रियते यदि घटानिबंधस्तथाकथितः ॥२९॥ वेश्याभुवने सदसि च भवने चैतेषु कस्यचिद्चरे ॥ रूपै
तुल्यप्रबोधवयसां समविद्याशीलवित्तानां ॥३०॥ अनुकूलैरालापैः पण्यस्त्रीभिस्सहासनं गोष्ठी ॥ का

व्यसमस्याचैषां कलासमस्या च तत्रोक्ता ॥३१॥ लोकानामिह कांतास्संपूज्यास्तास्तथोज्वलायाश्च ॥
प्रीतिस्तोमाएवं भवंति किल हारितास्सम्यक् ॥३२॥ अन्योन्यस्य गृहे वा पानं कथितं सुरासवप्रभृतेः ॥
विविधफलाद्युपदेशं वेश्यायाया अंततः स्वस्य ॥३३॥ एतेनैव निरूपितमुद्यानेयानमत्र विस्तारः ॥ वा- (५)
स्यायनानुरुध्यः क्रियते श्रीवीरभद्रदेवेन ॥३४॥ पूर्वाह्णे हृतभूषास्तुरगानारुह्य वेश्यया सहिताः ॥
प्रतिचारकैरनुगता गच्छेयुः शोभनोद्यानं ॥३५॥ दैवलिकीरथयात्रा यत्नादनुभूय तत्र युध्यानि ॥ कुक्कु-
टमेषप्रभृतेः पश्यंतोस्यास्तथाप्रेक्षाः ॥३६॥ कुर्वीत श्शुभचेष्टाः स्समयानोक्षिप्य चेयता कियतः ॥ उद्या-
नभोगचिन्हैस्सहिताः प्रसंव्रजेयुस्ते ॥३७॥ एतेनैव निरूपितमस्तया देवपुष्करिण्यादौ ॥ गमनं ज- (७)
लक्रीलायै ग्रीष्मगते तेजसां धाम्नि ॥३८॥ हृतसमयैरिह पुरुषैः पक्षांते चाधमास निर्यासो ॥ कस्मिंश्चि-
न्नियतेह नि सृजति सभां भारतीभवने ॥३९॥ दद्युः प्रेक्षणमेकं ये अपूर्वास्ते कुशीलवास्सम्यक् ॥ पूजां ते चल-
भेरन्नियतां तस्माद्द्वितीयेन्हि ॥४०॥ दर्शनमथवोत्सर्गो निजेच्छया स्यात्ततः परं तेषां ॥ आगंतवश्च पूज्याः
हृतसमवाया स्फुरद्विषयं ॥४१॥ कुर्याद्यपक्षरात्रिं सुखरात्रिः सा च कथ्यते लोके ॥ ऐकं कां जागरया कौ-

मुख्यास्तन्न निर्दिष्टं ॥४२॥ सुवसंतकोत्र शास्त्रे भवति वसंतस्य वासरः प्रथमः ॥ विशमखादिकां सरस्यां वि
शमुक्तिः कीर्तिता लोके ॥४३॥ मदनार्थिताम्रकुसुमैरवतंसे वप्रमंजिका प्रोक्ता ॥ अभ्यूषखादिकैवं ज्ञा
६ तव्याग्रे थतः परतः ॥४४॥ अन्योन्यं जलसेकः पानीयक्ष्वेडिकेरिता विबुधैः ॥ कृत्रिमे विवाहलीला क
थिता नवपत्रिका लक्षैः ॥४५॥ कृत्रिमपुत्रकलीला स्यादनुयानं तथा तु पाश्चालात् ॥ शाल्मल्यामधि
रूह्य क्रीडैका शाल्मलीकथिता ॥४६॥ युध्यं कदंबमूलैः प्रविभज्य बलं परस्परं यत् ॥ स्यात्तत्कदंबयु
ध्यं कुर्यादन्यास्तथा लीलाः ॥४७॥ एकत्रचारिणामिह विभवबलाद्वारयोषितां श्चैव ॥ नागरिकैश्च स
खीभिः चरितमनेनेह निर्दिष्टं ॥४८॥ विभवविहीने विद्यां जानन्निजा देहमात्रसाहाय्यः ॥ पूज्योदेशाद्धा
प्राप्तः केनकमुखसंयुतश्चैव ॥४९॥ निपुणः कलासु कथितेस्त्वस्यात्मानं प्रसाधयेद्यस्तु ॥ गोष्ठ्यां वेशाच
तथा जानीयात् पीठमर्दनात्तं ॥५०॥ भोगसमापितविभवः तत्रस्थः सगुणवल्लभासहितः ॥ बहुसंमतश्च
वेशे गोष्ठ्यां वशगो विटः प्रोक्तः ॥५१॥ यस्त्वेकदेशविद्यः क्रीडनको भूरिजातविश्वासः ॥ स स्याद्विदूषकः

किलवैहासिकसंज्ञकश्चैव॥५२॥एतेवेश्यानामिहनगरसदां चैवमंत्रिणः कथिताः॥ संधौविग्रहकृत्से=
विनियुक्ता आदरेणैव॥५३॥एतेनट्ध्यगणिकाः कलाविदग्धास्तथैवभिक्षुक्यः॥ मुंडाश्चैव वृषल्योग्रा
ख्याताः काममार्गेण॥५४॥ग्रामीणो बहुमानीशो साहाय्यान्याकुतूहलाविष्टान्॥ सुविचक्षणांस्तुजा
तान्एतद्वृत्तंसमाचरन्नैतु॥५५॥आध्याजनयन्भूयः कुर्वीतैवानुकारमेतस्य॥ अनुवर्त्यैवंश्च गोष्ठी
अनुरंजयेन्नमाचरेत्संगे॥५६॥अनुगृह्णीयादन्यांसाहाय्येनोपकारयान्निपुणः॥ इत्थंनागरवृ
त्तंकथितं श्रीवीरभद्रदेवेन॥५७॥भाषासंस्कृतयोरिहरचयसेकेनयोजनो गोष्ठी॥ सचनभवेद्बहुमा
नस्तस्मादुभयंप्रवर्त्तयिति॥५८॥एवंलोकविरुध्यांगोष्ठीस्वैरंविसर्पिणीश्चैव॥परहिंसनस्वरूपांकुर्वन्निं
द्योभवेल्लोके॥५९॥लौकिकहृदयसरसयाक्रीडामात्रैककार्ययातद्वत्॥ सहगच्छन्निहगोष्ठ्यां विद्वांसिद्धिंसम
भ्येति॥६०॥श्रीवीभद्रकृतिनाशास्त्रेसमबाणशासनानुसृते॥ साधारणैरचितोध्यायश्चतुर्थोसौ॥६१॥ ॥
अथतन्यतेप्रपंचोभूमीतलचक्रवर्तिनानेन॥श्रीवीरभद्रयूनाकामागमपंचमेध्याये॥१॥कामःप्रयुज्यमा

धिकरणे २

नो भवति सवर्णास्तु शास्यतश्चैव॥ हेतुस्संततियशसो लौकिकतामेति वर्णेषु॥२॥ प्रतिविध्योऽस्मादन्यः
परपूर्वा श्रेष्ठवर्णा योऽर्थ्यः॥ वेश्या स्वप्रतिष्ठितविधिध्योऽशिष्टेवाऽवर्णा जायाश्च॥३॥ एवं निरवसितायां
पुनर्भुविस्यात्तथान्यतः कामः॥ अवरापाणिग्रहणं मनुनाप्यादिष्टमेवास्ति॥४॥ तिस्रोत्र नायिकाः
८ किल कन्या वेश्या पुनर्भुवः कथिताः॥ वात्स्यायनस्य केचित्परदारान्वारणादाहुः॥५॥ अस्यास्वैरवि
हारस्तत्र च हेतुर्निसर्गतः कथितः॥ वेश्यानामिवतासां गमने तादृकुतो दोषः॥६॥ नूनं पुनर्भुवमिवग
मनं व्याख्यातवैमेवमेतेन॥ उत्तमवर्णाप्येवं नादध्यासंगतौ दोषं॥७॥ यद्वा स्वपतिममित्रं कुर्यान्मि
त्रमभाद्दृतापीला॥ सकामे प्रतिकूलं कुर्यादनुकूलमादरादेष॥८॥ एतद्द्वारा यदि वा हवैतस्याः पतिं
धनोदयं॥ आदास्ये धनमेतत्कारणमेवं मनोवृत्तिः॥९॥ एषैव वा प्रदास्यति धनमिति बुध्या प्रवर्तते
नस्यां॥ यदि वा तस्याभीष्टासंगममस्यां समाचरति॥१०॥ दोषं प्रकाशइष्यति संतमसंतमयापरिय
क्ता॥ संभावितो विनाशो येन मया दूषणस्यापि॥११॥ आयतिमंतं यदि वा वश्यं मत्तो विभिद्य मत्तीरं॥

मदमित्रमित्रभावं गमयेदेषामपात्यक्ता ॥१२॥ मदमित्रमेव यदि वा कुर्यात्स्ववशोऽस्फुरन्महाका-
मा॥ इत्याद्यैर्भयबोधैः परदारासेवनं कुरुते ॥१३॥ निजदाररनिरतदारानुबन्धदोषाद्व्रजेज्जनोऽनि-
यतं॥ एतद्द्वाराराजद्विष्टं हन्तुं तथायत्नः ॥१४॥ एतद्द्वारा यदि वा काम्यामन्यामयमुपारंभः॥ यदि वामि-
त्रं मित्रं द्वारयितस्या विधास्यापि ॥१५॥ इत्येवमादिहेतोः परकांतामेव सेवते कामी॥ न तु केवलानुराग-
द्वात्स्यायनभाषितेनैतत् ॥१६॥ विधवापि पंचमी स्यात्संबंधाया भवेन्महामात्रैः॥ अन्या वेति तु कथ-
यति मतमिह चारायणाचार्यः ॥१७॥ तामेव प्रव्रजितां सुवर्णनाभोऽप्यवस्थां षष्ठीं॥ अन्यामुक्तां
दुहितां गणिकायाः सप्तमीं दासीं ॥१८॥ घोटकमुखउपकल्पयति कुलयुवतिं चोपकारभेदेन॥ क-
थयति गोनर्दीयः यः वाभ्रमायनसंमतं नैतत् ॥१९॥ कार्यांतरस्य विरहादेताः ऽ कथिताः पुनश्च-
तुर्धैव॥ तस्माद्वात्स्यायनतः तासां भेदः चतुर्थैवा ॥२०॥ भिन्नत्वात्तु तृतीयाप्रकृतिस्यात्पंचमीम-

ते क्वापि। प्रच्छन्नप्रव्यक्तौ द्वावेतौ नायकौ कथितौ ॥२१॥ तौ त्रिविधौ प्रत्येकं श्रेष्ठाधममध्यमैर्गु-
णाद्यैर्भेदैः ॥ ते तु गुणानुभययोरपि विज्ञेया वैशिके विशदाः ॥२२॥ कुष्ठिन्युन्मत्ता वाभिन्नरहस्या
१ तथा तु या पतिता ॥ या प्रार्थिनी प्रकाशेगतकल्पं यौवनं तस्याः ॥२३॥ अतिशुभ्राप्यतिकृष्णा=
या च भवेद्दुर्भगा तथा च सखी। प्रव्रजिता संबंधे श्रोत्रियभूमीभुजो दाराः ॥२४॥ गम्या नैता लो-
के कथयति वात्स्यायनो मुनिश्चैवं ॥ यदि पंचपुरुषदृष्टास्तागम्या वाप्रवियप्यानां ॥२५॥ संबंधिश्रोत्रिय-
योयज्ञां दाराश्च तद्द्विधा नैवं ॥ इत्याह सर्वदर्शीनी निजमत्या गोणिकापुत्रः ॥२६॥ सहपांसुक्रीडितकं
संबंधं चोपकारयोगेन ॥ व्यसनस्वभावतुल्यं मर्मरहस्यानुवेत्तारं ॥२७॥ अविदितमर्मरहस्यं धात्री=
पुत्रं सहैव संवृद्धं ॥ पितृपैतामहयंतं वैकृतकैरविसंवादैः ॥२८॥ वश्यं ध्रुवमपलोभं परिहार्यं नाप्र-
काशकं मंत्रे ॥ संपदियं मित्राणां कथिता वात्स्यायनेनेह ॥२९॥ गांधिकतांबूलिकयोर्नापितगोपा-

लस्त्र ग्लतां चैव ॥ शौंडिकरजकविदूषकभिक्षुकविरपीठमर्दानां ॥ ३० ॥ एषां रमणीनामपि सुहृदः प्रो
क्तास्तथैव नागरिकाः ॥ दासीवृध्धवेश्यास्त्रीकलाविदग्धांगनानां च ॥ ३१ ॥ उभयोर्यत्साधारणमुभ=
यत्रोदाहृते स्तथा पात्रं ॥ नायिकया सविशेषं विस्त्रब्धं स्यात्स्फुरं मित्रं ॥ ३२ ॥ तत्र च कर्मणि पटुता धा
ष्ट्यं ज्ञानमिंगिताकृत्योः ॥ अनाकुलता याविरहः ज्ञानं देशस्य कालस्य ॥ ३३ ॥ बलतः कार्ये निर
तिः परसुखबोधाप्रतारणे तद्वृत् ॥ लघ्वी च प्रतिपत्तिः सोपाये ते गुणा दूते ॥ ३४ ॥ आत्मवता पुरुषे
ण तु युक्ते तोस्मिन्कुमित्रवर्गेण ॥ देशविदा कालविदा भावविदा चैव निर्यतं ॥ ३५ ॥ मुनसाप्यलं
न्यालब्ध्या युवतिषु धन्या समग्रलोकेषु ॥ विहिद्यापरलोकात्स्वबले संप्राप्यते सौस्नेनारी ॥ ३६ ॥
श्रीवीरभद्रकृतिनाशास्त्रेऽसमबाणशासनानुसृते ॥ साधारणेधिकरणे प्रथमइह निर्मि
तोध्यायः ॥ ३७ ॥ ॥ साधारणाधिकरणं प्रथमं श्रीवीरभद्रदेवेन ॥ व्याख्याय सांप्रयोगिकम

धुना निर्णीयते क्रमशः ॥१॥ अथ सांप्रयोगिकस्य प्रथमाध्यायस्य साधु वैशद्ये ॥ यतते श
रदशशशरधरविशदयशा भूमिपालोसौ ॥२॥ अत्र प्रथमेऽध्याये सुरतविशेषाभिधाः द्व
ताः प्रीतेः ॥ आलिंगने विचारः कथितस्तत्र द्वितीये तु ॥३॥ चुंबनयुजो विकल्पा नाहाध्या
ये द्वितीयतश्चरमे ॥ नखजातपश्चतुर्थे विधयो दशनच्छिदायास्तु ॥४॥ सहदेशेर्यरूपाचारैः
१० पंचमसंचारचंचुराश्चक्रे ॥ चित्ररतेस्सह कथितास्संवेशनसंविधाः षष्ठे ॥५॥ प्रहणनयोगा
युक्ता उदितास्तैश्चेह सीत्कृतारंभाः ॥ श्रीवात्स्यायनमुनिना सांप्रयोगिकसप्तमेध्याये ॥६॥ आध्या
येऽष्टमसंज्ञे पुरुषायिततदुपसृष्टके ज्ञेये ॥ उदितं तथापरिष्टकमिह नवमे सारविज्ञेन ॥७॥ सरतवि
शेषं कथितं तदुपक्रमकावसानिकं चरमे ॥ प्रणयकलहपरिनिष्ठितमेवं कथितो दशाध्यायः ॥८॥
श्रीवीरभद्रसुकृती स्मरशास्त्रे निर्णयं कुरुते ॥ एवं समासंग्रहमध्यायानां द्वितीयस्य ॥९॥ शाशा ट्व

तुरगास्त्रिविधा नायकभेदास्त्रिलिंगतो ज्ञेयाः ॥ बडबा मृगी च करिणी कथिता इह नायिकास्तिस्रः ॥ १०॥
शशमृग्योर्बडबायां वृषभेनाश्वस्य संगमश्चेभ्यां ॥ समरतमेव त्रितयं निर्दिष्टं मानतो विज्ञैः ॥ ११ ॥ विषमर
तानि तु षेढा मृग्यां वृषभस्य चाश्वया तुरगेः ॥ उच्चरतद्वयमेतद्ध्ययगम्योरुच्चतोप्यधिकं ॥ १२ ॥ नीचंक
रिणीवृषयोरश्वाशशयोस्तथैव निर्दिष्टं ॥ नीचतरं शशकेभ्यो रतमाम्नातं प्रमाणेन ॥ १३ ॥ शशावृषतुरं
गहरिणी बडबाकरिणीषु संक्रमो योगः ॥ समरतमक्रमयोगो विषमरतं षड्विधं प्रोक्तं ॥ १४ ॥ उच्चं पुंसश्चा
धिक्यादाधिक्याद्योषितो भवेन्नीचं ॥ अव्यवहितवैषम्येतरशब्दो नेष्यते तत्र ॥ १५ ॥ उच्चतरं नीचतरं-
व्यवधानाद्योग्यतस्समादिष्टं ॥ तत्र समानि रतानि श्रेष्ठान्युक्तानि सारज्ञैः ॥ १६ ॥ नीचतरोच्चतरे खलु
सुरतके निष्टे स्मरागमे कथिते ॥ नीचोच्चयोः प्रभेदा मध्या वात्स्यायने कथिताः ॥ १७ ॥ अंगेष्वतामहे-
रतयोस्त्वाद   कारणे यद्वत् ॥ तत्साम्येन समत्वं विज्ञेयं तद्वदेवात्र ॥ १८ ॥ आयामैः परिणाहैश्च यथा-
वरस्य युग्मकांगुल्हैक्रमशः ॥ गह्वै शशाशावृषतुरगाहरिणी बडबाकरिण्यश्च ॥ १९ ॥ स्त्रीपुंसयोर्विसृष्टे

स्रौघ्रं दैर्घ्यं तथैव माध्यस्थ्यं ॥ इत्येवं नवधा स्याद्रतमिह भेदेन कालस्य ॥२०॥ एवं भावजभेदा विज्ञे-
या अत्र संप्रयोगस्य ॥ सप्ताधिके हविंशतिनाख्याता ख्याता तस्य संख्येषा ॥२१॥ मृगवक्षो रुषतु-
११ रगाः पंच पुमांसः सरासमाः क्वापि ॥ हरिणीछागी बडवा करिणी करभी च नार्यो पि ॥२२॥ लक्षणमे-
षां ज्ञेयं तद्ग्रंथादेव नात्र वीरभद्रस्य ॥ वात्स्यायनीयविहितौ निरतस्सा स्याग्रहः क्वापि ॥२३॥ भावे
स्त्रियां विवादः कल्पयति भावं न सा यथा पुरुषः ॥ सा तत्या तपनोदः कंडूते स्तन्यते यूना ॥२४॥ तस्या
स्सा संसृष्टा पुनरभिमानप्रजोद्भवानंदैः ॥ जनयति रसांतरं यत्तस्मिं सुखबुधितस्योः ॥२५॥ पर
सुखबुधे विरहात्तत्र कथं तान कारणो भवति ॥ तस्मादासां भवता भावाभावः कथं प्रमितः ॥२६॥
इति चेद्विरमति पुरुषो भावप्राप्त्या निजेछयया यस्मात् ॥ न वस्त्रीन्यु निर्जमतमो द्यालः-
किः प्राह ॥२७॥ तस्या भावप्राप्तौ तदपेक्षस्सा पुमांस्च्युतो विरतौ ॥ स्त्री तु विरत्यां स्पृहयति पुं-
सो भावाय भावज्ञा ॥२८॥ ननु यदि भावो नासां तस्याराग श्चिरद्रुतौ पुंसी ॥ शीघ्रद्रुतौ च रोवो भा-

वापेक्षाकृतौ तौ हि ॥ ३० ॥ चिरतो भावप्रास्प्यारज्यंते पुंसि ताद्दशे नार्यः ॥ शीघ्रदत्तावलाभाद्वेषो युक्तो
मृगाक्षीणां ॥ ३१ ॥ एतद्भावप्राप्तौ सत्यां येनेह संभवे स्त्रीणां ॥ तस्मान्मतमौद्दालकिरमतं प्राहेत्ति के-
चनाचार्याः ॥ ३२ ॥ चिरकंडूतिनिवारणमिष्टमनिष्टं तदर्थकालेन ॥ भावं साधयतोऽतो नैतावितितन्म
तेनिरताः ॥ ३३ ॥ कंडूतेरपनोदे भावप्राप्तौ तुल्यते तस्य ॥ हेतोरिति संदिग्धव्याप्तिरसौ भावयोगेन ॥ ३४ ॥
अभिमानैरभियुक्ते सुमित्यभिधात्र युज्यते लोके ॥ तस्मात्कंडूनाशे सज्जाते वल्लभासंगात् ॥ ३५ ॥ कं
डूदुःखाभावे सुखमिति बुध्यिमृगायताक्षीणां ॥ भारापगम इवास्त्री सुखिनो वयमित्यधीराणां ॥ ३६ ॥
मतमिदमपरिछेद्यं स्वल्पमतीनां विविच्य यत्नेन ॥ श्रीवीरभद्रसूरी स्वकृतावौद्दालिके नाह ॥ ३७ ॥
सातत्यादारंभात्प्रकृति मृगाक्षीषु जायते भावः ॥ प्राप्ते तु नायकानामरतौ तासां न गर्भः स्यात् ॥ ३८ ॥ इत्यु
पपत्याप्राहुर्मतमुपपन्नं तु बाभ्रवीयस्य ॥ सापि समधिगतभावा पुरुषं नापेक्षते विरतौ ॥ ३९ ॥ न नु स

ततेस्याभावेस्यादारंभेनचित्तमाध्यस्थ्यं॥ अ[illegible]सहिष्णुत्वंचयथाशगविरद्धिः क्रमागपिच॥४०॥अ-
नपेक्षत्वंचयथावपुषोचिरतापेक्षणंचान्ने॥इ[illegible]चेन्न तुल्यतायामंदामंदत्वयोर्द ॥४१॥संस्कारे किल
१२ नि३ सदृशो॥ भ्रांतेश्च क्रस्यकुंभकर्मातुः॥ भ्रांतावेवनिव[illegible]तोदृष्टोमंदाधिकोवेगो॥४२॥चक्रभ्रमणे नैव व्याख्यातं
भ्रमणमयचान्यस्य॥ वेगैकत्वभिदोरिह चिंताव्यर्थाऽक्षते सांम्ये॥४३॥ अंते विरतेरीप्यांप्रतिहेतुर्धातु
संक्षयः प्रोक्तः॥ तस्माद्भावोसत्तिर्नार्याअपिनायकस्येव॥४४॥प्रच्युतनायस्त्रिसततंसुरतप्राप्ते तुजाये
तेपुंसः॥ तस्माद्भावाधिक्यंमा चिन्त्यंभावयेद्युक्त्या॥४५॥सदृशाकृताविभिन्ने कस्मादर्थैप्रवृत्तयोर्युनोः॥
वैलक्षण्यंकार्येनैषाशंकाचमत्कृत्यै॥४६॥ वैलक्षण्यमुपायेस्याद्भिमानेचकारणंतत्र॥ वैलक्षण्ये
मुपायेसर्गास्त्रिव्यक्तमेवात्र॥४७॥सर्गः स्वभावैभेदः कर्त्राधारौस्वभावतोभिन्नौ॥ भिन्नस्वभावयोग
द्यदिवासर्गः क्रियासर्गः॥४८॥कर्तापुमान्क्रियायां प्रतिपन्नोभवतियेनरूपेण॥ नारीततोन्यथास्या
माधाराभूसंयतते॥४९॥यदिवाधातुनिसर्गः सर्गस्तस्मादिहद्वयोर्भेदः॥ कर्तापुमानमुष्मिन्नाधारेना

नायिकाप्रोक्ता ॥५०॥ भेदकृतयावसेयः कर्तुरिहाधारतोथवायुक्त्या ॥ लक्षणसर्गासर्गः भिन्नौतौग्रंथ
तः कथितौ ॥५१॥ यद्वासर्गा सृष्टेकारम्भाधारतः परः कर्त्ता ॥ इतिकथितास्सर्गार्थाविदुषा श्रीवीरभद्रेण ॥५२॥ २
वैलक्षण्यमुपायेस्यादभिमानेपिकारणं तस्य ॥ अहमभियोक्तेतिपुमानभियुक्तेतिप्रवर्ततेनारी ॥५३॥ नह
नयोरिह भेदादल्पंन्नं किंन्नभिद्यतेकार्यं ॥ लक्षणभेदाद्भिन्नौतौनतुकार्यस्यतद्भेदः ॥५४॥ आसंतिकेतु
भेदेकारणभेदः प्रयोजकोनैव ॥ स्यादाहतेरभेदादात्यंतिकभेदवैधुर्यं ॥५५॥ नन्वेवंस्याद्भेदः प्रहतेका
येनकश्चनापीह ॥ एकार्थस्योत्पत्तौ कारकसंहानसंदृष्टेः ॥५६॥ इहतुपृथग्जिजकार्ये भिन्नेहेतुत्वमे-
तयोरुभयोः ॥ सहकारित्वंतस्मादूनोर्युक्तंकथंभवतु ॥५७॥ इतिचिन्नदृश्यतेखलुकार्यविभेदोपिसंह-
तौहेत्वोः ॥ मेषादेरिहयुध्येनह्यभिघातस्तयोरेकः ॥५८॥ उभयोस्सहकारित्वादस्यतयोरेकजातिनश्चैक्यं ॥
यत्तन्मल्लादीनामभिघातेपीक्ष्यतेसुलभं ॥५९॥ ननुमल्लादेर्युद्धेकारकभेदप्रधातथानास्ति ॥ अस्तितु
सुरतेतस्मादास्तामात्यंतिकोभेदः ॥६०॥ इतिचेन्नकेनचित्खलुरूपेणेहापिवस्तुनोरैक्यं ॥ आत्यं-

तिकस्य भेदो मल्लादौ दृश्यते नैव ॥ ६१ ॥ नन्वैक्ये पूर्वोक्ता भेदनिरुक्तिर्विरुध्यते नैवं ॥ सर्गाद्भेदो कावपि रू
पाभेदस्य मुक्तत्वात् ॥ ६२ ॥ आत्यंतिको हि भेदो यूनोस्सुखयोस्तु नेष्यते तस्मात् ॥ साद्वयप्रतिपत्तेस्सिध्धृहास
१३ र्वल्लोकेषु ॥ ६३ ॥ एकार्थार्थस्संयोगो दंपत्योरस्ति युक्तितस्साम्यं ॥ वल्लभइव वनितापि हि सदृशं सुखमश्नुते तस्मा
त् ॥ ६४ ॥ एवं तथोपचार्या योषित्सरुचेरायत्नतस्सम्यक् ॥ येनाप्नुयाद्रतिं तस्तकेन स्यादन्यथा निरता ॥ ६५ ॥ न
13 च साद्वयमसिध्धं दंपत्योर्नापि तज्जयोस्सुखयोः ॥ तस्माद्रतस्य भेदस्सिध्धः कालार्पितो नवधा ॥ ६६ ॥
काममते न विचारास्सह च समाख्या बुधेन निर्णीता ॥ रससरागभाववेगाः प्रीतिरतीसत्पर्याया ॥ ६७ ॥ मो
हनशयने कथिते तुल्यार्थे संप्रयोगरतशब्दौ ॥ सहितौ रहः पदेन वतुल्यार्थविश्रनिर्दिष्टौ ॥ ६८ ॥ उक्ता वि
भेदरतानां सांकर्ये भूयसी भवेत्संख्या ॥ तेषु भवंत्युपचारास्तत्कार्द्यास्यायथा ना भिमताः ॥ ६९ ॥ वेगश्चंडः
प्रथमे पुरुषस्य रते थ शीघ्रकालहं ॥ ७० ॥ तरस्ते च्वतोन्यद्योषिद्विपरीतमेतत्तु ॥ आधातुक्षयमासां तदुच्य
ते धातुसंक्षयः पूर्वं ॥ पुंसां स्त्रीणां पश्चाद्वादो सौप्रायिको लोके ॥ ७१ ॥ रतभेदानभिधाय प्रीतिविशेषान्नि

रूपयामोत्र॥आशुभवंतिमृगाक्ष्यांःप्रीतयइत्याहुराचार्याः॥७२॥उपमर्दत्वमृदुत्वेकोपिनिसर्गश्चयोषिता
माशु॥प्रीतिप्राप्तौहेतुर्विख्यातःकामशास्त्रेषु॥७३॥एतावतैवगदितोनिपुणमतीनामिहैवसंयोगः॥मंदमतेरव
बोधोविस्तरतोर● च्यतेतदनु॥७४॥अभिमानविषयजातेसंप्रत्ययतस्तथैवचाभ्यासात्॥प्रीतिश्चतुर्विधैवंल
क्षणमासांतुभेदाय॥७५॥ब्रूमःकर्माभ्यासान्मृगयादिषुयाचकर्मसुप्रीतिः॥बहिरिहशब्दादिभ्यःसाज्ञेयाभ्या
सिकीलोकैः॥७६॥यानभ्यस्तेकर्मणिपूर्वंविषयस्वरूपतोभिन्ना॥संकल्पेध्याप्रीतिर्ज्ञेयासाचाभिमानेन
॥७७॥साचौपरिष्टिकेस्यास्त्रीणामथवातृतीयकप्रकृतेः॥एवंचचुंबनादिषुविज्ञेयाकर्मसुप्रकरं॥७८॥अ
न्यस्मिन्नान्योयंयत्रचभवतीहकारणंप्रीतेः॥तंत्रज्ञैस्साकथितासंप्रत्ययेलक्षणाप्रीतिः॥७९॥शब्दादिवि
षयजातायात्रक्षत्यास्तिलोकतःसिध्धा॥प्रीतिस्साविषयोढाकथितातज्ज्ञैश्चतुर्थीयं॥८०॥एतत्प्रीतो
हेतुःप्रीतिमदेनाभिधियतेकस्मात्॥इतिचेन्नलक्षणयाशास्त्रेरिवतत्रबीजत्वात्॥८१॥संबंधोत्रचबी
जंतादर्थ्यंतच्चतत्फलेशक्तिः॥एवंचतुर्विधेषाप्रीतिर्मुख्याधिकानेव॥८२॥एताज्ञात्वाप्रीतीःकारय

१४
14

भेदेन शास्त्रतो भिन्नाः ॥ अभिवांछन्नभिवृद्धिं कारणं वृद्धिं समातनुयात् ॥८३॥ श्रीवीरभद्रकृति
ना शास्त्रेऽसमबाणशासनानुसृते ॥ सांयोगिकेऽधिकरणे प्रथमोऽध्यायः कृतः सांगः ॥८४॥ ॥एतद्वि
तिय्यमधुनाध्यायं व्याख्यातदोर्द्दर्पः समरे ॥ व्याख्याति वीरभद्रो भद्रतरो राजवर्गेषु ॥१॥ अष्टविक
ल्पा अष्टावालिंगनचुंबनादयः कथिताः ॥ अष्टाष्टतैकतासां भवति चतुःषष्टिरित्येके ॥२॥ प्रायोवादं
कथयति भेदाधिक्यात्तथाल्पतावशतः ॥ चित्ररतादि निवेशात् सूत्रे वात्स्यायनाचार्यः ॥३॥ षलिपंच
वर्णता वसस्छदता प्रयोगवद्दृष्टे ॥ असमशरागमवेत्ता प्रकृतचतुष्षष्टिशब्दस्य ॥४॥ एतावंतोऽस्मिं=
च्छास्त्रे प्रकरणसंख्यास्ततश्चतुःषष्टिः ॥ इत्येके आचार्या आहुरतोऽन्येन्यथा प्राहुः ॥५॥ तावत्संख्याग
दिताः कलाइहांगं हि संप्रयोगस्य ॥ इति मतमेषामुदितं विदुषा श्रीवीरभद्रेण ॥६॥ असमागतयोः प्री
तौ लिंगस्य द्योतनं समुद्दिश्य ॥ आलिंगनं चतुर्विधमुक्तं बाह्ये रते प्रथमं ॥७॥ तत्र स्पृष्टकमाद्यं विध्य= 2.
कमुक्तं ततः पुनः परतः ॥ उद्धृष्टकपीडितके ततः परेऽन्वर्थता चैषां ॥८॥ स्थितमुपविष्टं यदि वा निजनभो

3. 4.

यादृदासमुद्दिश्य॥विध्येकुचेनकिंचिन्मृगयेनयनागृह्णतीवस्तु॥९॥तामवपीड्ययुवापिचगृह्णीया
द्विध्यकंभवेदेतत्॥अनतिप्रवृत्तवचसोरुभयविधकथ्यतेचैतत्॥१०॥जनसंबाधेतिमिरेविगतजने
वाधगच्छतोरथानकैः॥अंगानांवि घृष्टिर्निगदितमुद्घृष्टकंविबुधैः॥११॥कुड्यादौपीडनतःपीडितकं
तच्चकथ्यतेविबुधैः॥द्विविधमिदंज्ञातायामन्योन्यस्याकृतौभवति॥१२॥चत्वारिसंप्रयोगेणालंल-
तिकेवसम्यगावेष्य॥१तिमवनमयतिचुंबितुंस्यमुखांभोरुहंयदिवा॥१३॥उद्धृत्यमंदसीत्कृतरुचि-
रातत्रप्रतिष्ठितंकिमपि॥रमणीयहंपश्यतिभवतिलतावेष्टितंतत्तु॥१४॥चरणेनचरणमादायाक्रम्या
नेनयोनुमेतस्य॥आवेष्ट्यचैकबाहुःपृष्ठेऽसंचावनम्यैव॥१५॥भुजशुभलतयापरयारचितातस्य
ल्पकूजितश्वसिता॥यच्चुंबितुमधिरोहतिकथितंवृक्षाधिरूढंतत्॥१६॥एतद्द्वितयमुदाहृतमूर्ध्व
स्थितकर्मकामकर्मज्ञैः॥अधुनातिलतंडुलकंलक्षणतःकथ्यतेज्ञाह्या॥१७॥बाह्वोरूवैरथवाऽन्यो
न्यासाद्यत्रसस्वजातेतत्॥उदितंशयनस्थितयोरतिसंघटनेनतद्विज्ञैः॥१८॥रागांधावनपेक्षितवि

5. गमौ वपुषो यदा स्फुटं कुरुतः ॥ आलिंगनं तदुक्तं क्षीरजलं कामशास्त्रेषु ॥१९॥ उत्संगेनुगतायामथवा
शयने निजाभिमुख्येन ॥ यत्रोद्धरतररागावनपेक्षितविग्रहापगमौ ॥२०॥ अन्योन्यं प्रविशत इव वक्षो
रजलं तन्निगद्यते विबुधैः ॥ रागक्षणे तदुभयं चत्वारो बाभ्रकीयानां ॥२१॥ ऊरूपगूहनं स्यात्सर्वप्राणं नि
पीडयेद्यत् ॥ ब्वत संदंशादूरुयदि वोरुकस्यचित्सक्षे ॥२२॥ प्रविकीर्णकेशहस्ता हसा जघनेन जघन
दृढयोगं ॥ नखरदशनाभिघातं चुंबनमथवा समुद्दिश्य ॥२३॥ उल्लंघयेदुपरियत्तकरवलु जघनोप
6. गूहनं कथितं ॥ कुचयुग्मकेन वक्षसि संविष्टावेशयेद्भावं ॥२४॥ तत्रैव संन्नियुक्तं स्तनयुगलं भोज
7. गूहनं विबुधैः ॥ प्रोक्ताललाटिकासौ हन्याद्भालस्थलं तेन ॥२५॥ विनिधाय वक्त्रे कमलेव क्त्रेन यने
8. नदृगभ्रयोर्यत् ॥ एकांगालिंगनमिदमुक्तमिहो वादिकुत्रापि ॥२६॥ संवाहनमुपगूहनभेदं कथयं
9.? तिकेचनाच्यार्याः ॥ संस्पर्शहाकालेभेदादेवं फलेचैव ॥२७॥ साधारंण्यवियोगादालिंगनतः
पृथक्त्यामनुते ॥ संवाहनं स्मरागमवेत्ता वात्स्यायनाचार्यः ॥२८॥ आकर्णयंतियेवायेवाकथ

यंतिये च पृच्छंति॥ आलिंगनविधिमखिलं भवति रिरंसापरा तेषां॥२९॥ अन्येपि रागशक्ताः संयोगायेह्य
सूत्रितास्तेपि॥ आदरतोत्र विधेयाः नित्यं सांयोगिके कृत्ये॥३०॥ तावच्छास्त्रक्रमयोर्लोके भूयानिहादनो-
भवेति॥ यावन्मंदरसानां नैव नराणां रतिप्रचयः॥३१॥ रागामृतप्रवाहे पतितलतयाये पुनः पराधीनाः॥ तेषां
शास्त्रक्रमयोस्तरयोरारोहणं कुत्र॥३२॥ श्रीवीरभद्रकृतिना शास्त्रेऽसमबाणशासनानुसृते॥ सांयोगिके
धिकरणे रचितोऽध्यायो द्वितियोसौ॥३३॥ अधुना तृतीयमर्थे योजयितुं जातनिर्भरोद्योगः॥ जयति जिता-
रिवधूजनगीतयशा वीरभद्रोसौ॥१॥ नेष्टं पूर्वापौर्वापर्यं चुंबननखदशनकर्मणां शास्त्रे॥ युगपद्वाक्रमतो-
वा जायंते रागयोगेन॥२॥ संयोगात्प्रागेषां प्राधान्येस्याल्लयोगस्तु॥ प्रहणनसीत्कृतियोगः संयोगे केचिदि-
हुः॥३॥ सर्वं सर्वत्र भवेद्रागस्यावेक्षितस्तत्वं॥ वात्स्यायन इति कथयति तेषु विकल्पो रते प्रथमे॥४॥ अप्रव्य-
क्ति ह्यमिलितत्वे रागादेवं स्वभावमर्यादा॥ अवतरितव्यक्तिः समुच्चयश्चाग्रतः प्रोक्तः॥५॥ संधुक्षणमेवं
सति रागस्यतो शानोस्त्तदिं सौर्भवति॥ अधुना विविच्य कथयति चुंबनदेशान् स्मरस्मेरः॥६॥ ओष्ठांत

१६

वक्त्रं कक्षाः वक्षस्तनभालदेशगल्लगंडाः॥ नाभेर्मूले संधापूर्वोरपिल्लारजातानां॥७॥ रागवशाद्देशवशाद्दे
शाः केचिच्च चुंबने कथिताः॥ सर्वजनानां नैवं वात्स्यायनभाषिते नैतत्॥८॥ कन्याचुंबनमुक्तं निमितं स्फु
रितं तथा च घट्टितकं॥ तत्र बलेन नियुक्ता वदने वदनं यदाधत्ते॥९॥ निश्चेष्टा तत्कथितं निमितं वदने प्रलेढि
तं चोष्टं॥ निजमोष्टं स्पंदति यत्ति गृहीतुमस्तोत्तरा चैव॥१०॥ एतत्स्फुरितकमाहुः कश्चित्सरिग्ध्य जिव्ह
याग्रेण॥ घट्टयति मीलिताक्षी नयनाद्वृत्तिहुत्तराज्वेन॥११॥ घट्टितकं कथितं तत्सममथ तिर्यक्त भैवं
चोद्भ्रांतं॥ पीडितमवपीडितमिति पश्चादधरचुंबनं प्रोक्तं॥१२॥ आदायांगुलिपुटतः यत्नोष्ठं चारु जिव्हया
ग्रेण॥ घट्टयति निर्दशनतः पीडनतः पंचमं प्रोक्तं॥१३॥ न तु लक्षणमन्येषां कथितं श्रीवीरभद्रदेवेन॥ वा
त्स्यायनसूत्राणामेव व्याख्यायतः॥१४॥ द्यूतं प्रवर्तये दिह जितमेतस्यास्तु रोष्ठपातेन॥ इति पणबंधपु
रःसरमत्र जिताया इदं कार्यं॥१५॥ सास्त्रविलोचनकमला धुनुयादेषां करांबुजे सहसा॥ प्रणुदेदथ च
दशेदपि तरसा परिवर्तये च्चैव॥१६॥ बलतो हृते च विवदेद्दूयो द्यूतं प्रवर्त्तये सपणं॥ आयासं हि द्वियु

ष्टां सा तत्र ज्ञिलदर्शये चेवं ॥१७॥ दशनांतर्गतमधरं हठाद्विश्रब्धमत्तयोरपि च ॥ क्रोशेद्धि सहेतु ज्ज्ञानः
मादरतश्चाचरेदेषा ॥१८॥ विलपन्नयनमुखाक्षानर्तितसभ्रूलतालसत्सुखमा ॥ प्रहसन्नाशनकैरथक
येद्वाच्यानिरम्याणि ॥१९॥ प्रहृत्यास्यां ननखदशनाहतिकलहे द्यूते मुनैव संकथितः ॥ एषां प्रयोगयोगो वेगा
धिको भवेद्यूनोः ॥२०॥ सात्म्यादप्यथ कार्यः चुंबत्यामेव चांबुजास्यायां ॥ उपरितनौष्ठग्रहणे रागप्रद
मुत्तरौष्टं स्यात् ॥२१॥ ओष्ठाभ्यां संदंशादवग्रहोष्ठौ च चुंबये यत्र ॥ संपुटकं तन्त्रिणां व्यंजनरहितस्य
पुरुषोपि ॥२२॥ इतरोपि तत्र तस्याद्दशनजिंह्वाग्रतः मुखाद्गृह्णयेत् ॥ तालुगतां वा जिह्वामथवा जिह्वा
द्वयं वापि ॥२३॥ दानम्** ग्रहणे कथिते बलतो वदनांबुजन्मनोप्यस्यात् ॥ स्थानविशेषाक्षेपे चुंबनदेशे
चतुर्थतत् ॥२४॥ समपीडितमृदुभेदादंचितसहिताप्रकीर्तिता न्वधाल् ॥ इति विस्तरतः कथितं चुं
बनमधरस्य चान्यस्य ॥२५॥ सुप्तस्य वदनविनिहितदृष्टेर्यद्येह चुंबनं भवेत्स्वरसात् ॥ तद्रागदीपना
ख्याविख्यातं कामशास्त्रेषु ॥२६॥ अनवहितविवदमानो स्वपन्नाभिमुखोथवान्यतोभिमुखः ॥ एते नि
द्राहतये चुंबं तेन द्भवे च्छलितं ॥२७॥ चुंबति तदानिरुक्तं शास्त्रेस्मिन्प्रातिबोधिकं विज्ञैः ॥ शयनेय

दाप्रसुप्तां चिरकालादागतः ॥२८॥ संलक्ष्येहागमने कालं संमानकामनातरला ॥ स्वास्याखिलप्रसुप्ताः
जिज्ञासु स्य भावस्य ॥२९॥ आकारदर्शनार्थे विषमशराकारचुंचुनाकारः ॥ आदर्शादौ छायां परिचुंब
१८ तिनायकः सुतनोः ॥३०॥ बालस्य प्रतिमायाश्चुंबनमथ चित्रकर्मणः प्रोक्तं ॥ आलिंगनश्च लोके संक्रां
17 तकमत्र सारज्ञैः ॥३१॥ प्रेक्षणके निशि यदि वा स्वजनसमाजे समीपयातस्या ॥ हस्तांगुलिपरिचुंब
नमिह विज्ञेयं प्रयोज्यायां ॥३२॥ संवेष्टस्य पदांगुलि चुंबनकर्मैवमेव विज्ञेयं ॥ नायकं वा कामाकुरुते
निद्राव्याजेन तस्योक्ता ॥३३॥ संवाहिकाविधानं वदनसुधांशोर्यदा तदा कथितं ॥ चुंबनमूरूपदोत्त
रमह्यं गुष्टस्य चैव स्यात् ॥३४॥ इति चुंबनानि कतिचित् कथितान्येवाभियोगिकानीह ॥ एवं चुंबनभेदा
विज्ञेयाः कामशास्त्रेण ॥३५॥ कुर्यात्कृते स्वतिहतं प्रति ताडितमाचरेत्तथा तत्र ॥ चुंबितके प्रति चुंबनमि
ह करणेनाचरेत्तेन ॥३६॥ श्रीवीरभद्ररचितेनाशास्त्रे [illegible]सबाणशासनानुसृते ॥ सांप्रयोगिकेधिकर
णे रचितोध्यायः तृतीयोसौ ॥३७॥ ॥ अथ यतस्तेऽध्यायेऽस्मिंसांगता ये चतुर्थे ता भाजि ॥ यस्य

वदान्यतयान्यस्य दशाः कल्पद्रुमान्नास्ति ॥१॥ अथ कथयति नखभेदान्कथितान्वात्स्यायनीय
सूत्रेण ॥ आलिंगनप्रभेदांश्चैव चुंबनभेदान्विनिर्णीय ॥२॥ संघर्षक्रमयुक्तः रागाधिक्ये विलेखनं
नखतः ॥ प्रथमसमागमसमयः तस्यादिमः पुरुरोक्तः ॥३॥ गमनप्रत्यागमयोः शेषापगमे तथाप्रमा
दिच ॥ नित्यमचंडवेगयूनोरेतन्न संभवति ॥४॥ एते नखहतिसमया दशमेषु त्रासनानुसृते ॥ एवं
दशानच्छेद्यं सास्य वशाच्चान्यदाप्युभयं ॥५॥ निर्दिष्टमस्य भेदं छुरितरमर्थं दुमं डलेरेखा ॥ व्या
घ्रनखं शशाक ॥ प्लुतमुत्पलपत्रं तथैवान्यत् ॥६॥ इदं मयूरपदकं स्थानान्येषामतः परं ब्रूमः ॥ कक्षा
सनशौ लावधजघनं चोरुगके : पृष्ठं ॥७॥ एतद्रागात्पूर्वे रागाधिक्ये तु लीलया रचेत ॥ नखस्थानस्य गवेषण
मित्येके प्राहुराचार्याः ॥८॥ वामे हस्ते सर्वे द्वित्रा वा स्युर्नखाः स्फुरच्छिखराः ॥ चंडवेगयूनोस्याल्पे वा तद्वि
निर्दिष्टं ॥९॥ उज्वलतामलिनत्वे वर्धिष्णुत्वं तथा मृदोर्भावः ॥ नखरगुणाद्याश्च तेषां विरहः स्फुटो दो
षः ॥१०॥ दीर्घाणि हस्तशोभां कुर्वाणानीह गौडजातानां ॥ आलोकनेन सुदृशां चित्तग्राहीणि तापं ते ॥११॥

हस्तैस्तु दाक्षिणात्याः कर्मसहिष्णुत्वभाजिभिर्नखरैः॥ स्वेच्छयावशाद्विकल्पेयातिभिरुद्दीपकामदने॥
॥१२॥ मध्यान्युभयगुणानितु कलयेत्त्येतानि ते महाराष्ट्राः॥ उभयविधह्यादेषामुभयगुणार्हं भवेदुचितं॥
॥१३॥ सुष्टु नियमितैरेतैर्हनुदेशे वा कुचांबुजाद्वितये॥ अधरे वा स्फुररेखं लघुकरणं संगमात्रेण॥१४॥
पुलकोद्गमनसमर्थं प्रांते न्योन्यं तथा च संघर्षात्॥ परिवर्धमानरागाद्वादाच्छुरितं कथ्यते विबुधैः॥१५॥ आ
च्छुरितकं प्रयोज्यं मूर्ध्नः कंडूयने तथांगस्य॥ संवाहनादिकर्मणि तद्वदिदं व्याकुलीकरणे॥१६॥ नखपद=
निवेशनं यद्वक्रं स्यादर्धचंद्रकं तदिदं॥ स्थानममुष्य तु कुचयोः पृष्ठं ग्रीवं तथा प्रोक्ताः॥१७॥ अन्योन्या
भिमुखहे मंडलकं स्यान्नखांकयोरुभयोः॥ स्थानममुष्य निगदितं नाभीमूलादिशास्त्रज्ञैः॥१८॥ दीर्घा
कियतिर्रेखा नखरेण नापने यातु॥ अस्य स्थानं सर्वं कामागमपारगैः कथितं॥१९॥ वक्रा भवति तु रेखा
व्याघ्रनखं सार्वदेशगं प्राग्वत्॥ सकलनखाग्रविरचिता चूचुकसामुख्यसौभाग्याः॥२०॥ ज्ञेया मयूरप=
दकं चूचुकसान्निध्यशोभनाः॥ पंच॥ नखराघाताः प्रोक्ताः शशकप्लुतसंज्ञया लोके॥२१॥ स्तनपृष्ठेय

दिवो वैर्दिशांतरयानवांछयातरशः॥ कुर्यात्संहतरेखाः स्मृतये तिलस्वश्चतस्रो वा॥२२॥ अन्याकृतीनपित
थाकुर्याद्रेखानखोद्भवास्तरुणाः॥ कौशलविधयोनंताः सर्गे धातुस्तथाकृतयः॥२३॥ कर्मणि भवति च
निपुणः सर्वत्राभ्यासयोगतस्तुरूप॥ रागवशादिह युक्तस्यादभ्यासस्समस्तस्य॥२४॥ तस्मादत्र विधेयाः
कथितादन्येपि कामुकैर्भेदाः॥ इति कथयत्याचार्यश्चित्रापेक्षा गृहेप्यस्ति॥२५॥ वैचित्र्यान्नखराणां कार्योरा
गः परस्परं यूनोः॥ भवति विचक्षणतायां रागाधिक्यं स्फुरं जगति॥२६॥ विद्वांतरेपि निपुणः पूज्यं ते भू
रिशालिभिस्ते*षु॥ किं पुनरिह रेत्याहुः वात्स्यायनसंज्ञया रूढाः॥२७॥ परनारीषु न कुर्यान्मदने पूरे न
खतान्नखाघातान्॥ स्मरणाद्यर्थं कुर्यात्तासां छन्नेषु देशेषु॥२८॥ पश्यात्यनखरक्षतमम्रकरस्थान
मंडनं सुतनोः॥ चिरमुत्सृष्टापि नवा भवति प्रीतिमनस्सुखदा॥२९॥ भजति पराभवमेषा प्रीतिर्नीरागेषु यु
रयुक्तेषु॥ रागभवनसंस्मारकमस्तमितं चेन्न खेश्चिन्हं॥३०॥ नखभूषितकुचकमलां युवतिं*दूरात्प्र
पश्यतो यूनः॥ प्रभवति भूयान्मनोरागाधिक्यं परस्यापि॥३१॥ चित्तं स्थिरमपि सुदृशां दृष्ट्वा पुरुषं वि

चितं नखरैः ॥ चंचलतामधिगच्छति सरसिजमिव चान्ययाभिहतं ॥३२॥ रागविरुध्यावपरं नातः कि
मपीह विद्यते लोके ॥ नखदंताभ्यां रचितावपुषिच्छेदा यथाशक्ता ॥३३॥ श्रीवीरभद्रकृतिनाशास्त्रेऽस
१९ मबाणशासनुसृते ॥ सांप्रयोगिकेऽधिकरणे रचितो ध्यायश्चतुर्थोसौ ॥३४॥ ॥पंचममध्यायमसौ ज
लनिधिवेलासुकीर्तितः कविभिः ॥ स्पष्टीकरोति कार्तिकचंद्रकरप्रस्फुरत्कीर्तिः ॥१॥ स्थानानि चुंबना
19 नांदशनच्छेद्यस्य चारुबोध्यानि ॥ अंतर्मुखोत्तरोष्ठमुखानयनांबुजे चैव ॥२॥ समता स्निग्धाच्छायारा
गग्रहणे च भूरिसामर्थ्यं ॥ युक्तप्रमाणता वाच्छिद्राभावोग्रतस्त्वे क्ष्णयं ॥३॥ एते दशनगुणास्युः कुंठाबा
ह्योद्गतास्तथा परुषाः ॥ विषमास्सूक्ष्माः पृथवो विरलाज्ञेयास्तु दुष्टेषु ॥४॥ सोच्छूनकमिह गूढकमु
च्छूनकं बिंदुरुत्तरा माला ॥ प्रोक्ताः प्रबालमणिरथमणिमाला चाभ्रकं खंडात् ॥५॥ पसहैतेष्टममुदितं च
वितकं स्याद्वराहतः परतः ॥ ईषद्रागैरेभाव्यं गूढकमधरस्थले कथितं ॥६॥ मध्येथ तस्य कथितो दंत
भ्यां खंडनादसौस्तोकान् ॥ गूढकमुच्छूनकमधनिःखंडमेव निर्दिष्टं ॥७॥ ज्ञेयः कपोलभागे स्थेमासः

मणेः प्रवालकस्यापि॥ सुदृशां वामकपोलेऽलंकरणं चुंबनं नखरः॥७॥ दशनच्छेद्यसमेतं कथितं तत्कर्णपूर
कं चैव॥ दंतौष्ठौ प्यारचिते नित्यं निष्पंदे पीडने ऽभ्यसनात्॥९॥ सिद्धिः प्रवालकमणेः स्थानममुख्यं स्फुटं के
थितं॥ देशांतरे तु कथिता दशनानैकोमणोर्माला॥१०॥ उभयत्र भूरिदंतैः कथिता प्रकरं च बिंदुमालापि॥ मा
ला ऽथ प्रदेशे गल्लकक्षादिस्समुद्दिष्टा॥११॥ युक्तं विषमैस्त्रिशस्वरैः स्तनयोः पृष्ठे च मांडलाकारं॥ खंडाभ्रकं
निगदितं स्वल्पभिदा बिंदुमालायाः॥१२॥ संहतियुक्तादीर्घवक्रीदशनाहते स्फुटपंक्ति[illegible]ः॥ शोणांतराल
शोभाश्च वितमुक्तं वराहस्य॥१३॥ स्थानममुख्यं सुदृशां कुचकरिकुंभौ विनिर्जिताभोजौ॥ एतद्वितयमुदाहृत
मुद्भटवेगौ यदा चोभौ॥१४॥ स्यादभियोज्यानामिह तांबूले चापि कर्णपूरादौ॥ नखरदशनाभियोगः स्यादि
दमभियोगसंबंधि॥१५॥ उपचारो नारीणां रुचिरो देशानुसारतो भवति॥ शुचिरार्यत्रायाणां कथितो सौ
मध्यदेश्यानां॥१६॥ चुंबननखपददंतक्षतविद्वेषिण्य स्त्वत स्त्विमाः कथिताः॥ एषइव रीतिरुक्ता बाल्ही
कावंतिजालानां॥१७॥ आलिंगनपरिचुंबनचूषणनिरताक्षतेतथाविरताः॥ प्रहणनसाध्यावध्योमा
ल्हदेशोद्भवा बोध्याः॥१८॥ आभीरप्रभवानां सुदेशामेषैव रीतिरुद्दिष्टा॥ सिंधुनदीषष्ठीणामंतस्थानां च

नारीणां ॥१९॥ निष्ठैपरिष्टके स्याल्लाटमृगाक्ष्योपरांतिकाश्च तथा ॥ प्रोक्ताः प्रचंडवेगाः सीत्कृतमंदास्तथै-
वैताः ॥२०॥ स्वरवेगा खलवेगाश्च   वस्तुनिरुक्तरूचो गाढसंप्रहाराश्च ॥ विज्ञेया रतिनिरतैः स्त्रीराज्ये कोस-
लायांच ॥२१॥ रतिनिरताश्च लिमृद्व्वो शुचिरूचयः शिष्टनिंदिताचाराः ॥ आंध्रोद्भवामृगाक्ष्यः महाराष्ट्रप्रो-
२० द्भवा वनिताः ॥२२॥ अश्लीलपरुषवाक्याः रागिण्यः श्चारिवलप्रयोगेषु ॥ शयने सरभसलाः ज्ञातव्याः काम-
20 शीलेन ॥२३॥ मरहठजा समाना नागरिका रहसि वप्रकाशांते ॥ द्राविडस्त्रियो रतादिह मंदं मंदं प्रसिंचंति
॥२४॥ मध्यमवेगा स्युर्महास्यागिन्यः परुषकुत्सितादीनां ॥ स्वपरापचारमुद्रणाकथनरताया वनोद्भूताः
॥२५॥ मृद्वंग्यो मृदुभाषा स्फुरदनुरागाश्च गौडवामाक्ष्यः ॥ देशात्सुवर्णनाभः प्रकृतिं शास्त्रे बलीयसीं प्रा-
ह ॥२६॥ एवं चोपचरेदिह कालं प्रकृतिं समीक्ष्य वामाक्षीं ॥ देशानुसारतस्सा तुष्यति नैवान्यथा प्रकृतिः
॥२७॥ कालविशेषानुसृते नुपचारा वाथवा शुभा लीला ॥ देशं देशांतरमपि गाहंते तास्तथा विद्यात् ॥२८॥
पूर्वंपूर्वं हितकुरुते रध्यैं चतुर्थुरास्य ॥ आलिंगनादिवुमतं चित्रैर्हे वोत्तरं तद्वत् ॥२९॥ पुरुषो निवार्यमाणः मि
कुर्याद्यद्दशनतः क्षतं तस्याः । असहिष्णुस्तत्कुर्याद्द्विगुणाहरिणोक्षणा तस्य ॥३०॥ बिंदोः प्रतिक्रियायां

मालातस्याश्चनैरदन्तराकलः॥ इत्याविष्टेवरुषाकलहान्तरलियोजयेदबला॥१॥ सकचग्रहमस्यास्यं दृढो-
न्नतमापिबेत्ततस्त्वरितं॥ आमीलयदृशोदथसमदाशमनस्थलेबाला॥२॥ उन्नम्यकंठदेशं वक्षस्थले सं-
ल्ल स्मृताप्रियस्यैवा॥ मणिमालां रचयेदिह यश्चांन्तेक्षितंरदजे॥३॥ दिवसेजनसंबाधेस्वकृतंचिन्हंप्रि-
यः समुद्दिश्य॥ दर्शयतितच्चदृष्ट्वाऽदृष्टान्यैस्सोपहासास्यात्॥४॥ मुखमिवहृष्ट्वायंतीनायकमि-
वकुसयत्यसौनिपुणा॥ सांगनिबर्हणंचिन्हं प्रथमेदिहसाम्र्यहृयेव॥५॥ अन्योन्यानुगुणाद्देवंल-
ज्जाविशिष्टयोर्यूनोः॥ अपिसंवत्सरशतकेनप्रीतिर्हियतेरुचिरा॥६॥ श्रीवीरभद्रकृतिनाशास्त्रे ×
ऽसमबाणशासनानुसृते॥ सांयोगिकेधिकरणे निर्मित इह षष्ठमोध्यायः॥७॥ अथषष्ठंस्पष्टय पंच
तिप्रतिभरकष्टस्फुटोयमरव्यातः॥ सांयोगिकेधिकरणेध्यायंध्यातोरिवर्गेण॥१॥ उच्चतरेबहुरा
गाहरिणीसंवेशमाचरेज्जघनं॥ हृद्धारहसिविशालं संकुचितंहस्तिनीनीचे॥२॥ यत्रसमतयान्या
प्योयोगस्तत्रस्थितिस्समाजघने॥ मृग्यातथाकरिण्याबडबारव्यातामुनींद्रेण॥३॥ प्रतिगृण्हीः
याद्रमणंजघनेनाशायवस्तुनासहितं॥ नीचतरेसविशेषंरतयोःपरयोर्यदृच्छयेह॥४॥ उत्फुल्लकं

विजृंभितमिंद्राणीति त्रयं दिशोन्मृग्याः॥ ग्रंथांतरे तु निगदितमुत्कूलकामादि संविज्ञैः॥५॥ नीचं
विधाय शीर्षं बलहरिणदृशः स्मरागमाच्चार्यैः॥ ऊर्ध्वं विरचितजघनो नवयेदुत्कूलकं प्रथमं॥६॥
२१ तत्र प्रसारयित्वा तिर्यङ्नीचे तु सक्थिनी कांतं॥ अवसज्य चेत्प्रतीछे जृंभितकं तद्विनिर्दिष्टं॥७॥
साम्येन हरिणनयनास्वोंतर्विन्यस्य पार्श्वयोर्यूनः॥ तज्जानुनी स्वपार्श्वे वहेद्राणीचिरं लभते=
21 ॥८॥ इंद्राण्या व्याख्यातं रतमुच्चतरं च वीरभद्रेण॥ प्रतिगृह्य संपुटेन तु गृहीयात्स्फुटं नीचे॥९॥
एतेम व्याख्यातं नीचं रतमत्र वीरभद्रेण॥ हस्तिन्याः संपुटकप्रमुखं प्रोक्तं रतं शास्त्रे॥१०॥ पीडि
तकं वेष्टितकं बाडबकं चेति संपुटप्रमुखं॥ संपुटकं द्विविधं तत्सार्वोत्तानप्रभेदेन॥११॥ यत्रोभयो
रुभावपि मयतोऽबध्वा प्रसारितौ चरणौ॥ तत्र भवेत्संपुटकं द्वैविध्यं चेद्दशाकारान्॥१२॥ अधिश
यनं दक्षिणतो नार्याः पुंसोयतोस्ति सर्वत्र॥ तस्मात्पार्श्वरतावपि दक्षिणभागस्थितिः पुंसः॥१३॥
संपुटके दृढमात्रतः संपीड्यते पीडितं तदाप्रोक्तं॥ व्यत्यासे स्यामावेर्वेष्टितकं कामशास्त्रेषु॥१४॥ ब

ब

डुबेववेष्टितंचेदवगएड्डीयाध्वजेप्रियापुंसः॥तद्वाउबिकंनिगदितमभ्यासादांध्रवेश्यानां॥१५

रामनृपतितनुजनिनाश्रीवीरभद्रदेवेन॥इतिकथितास्संवेशानरीतयइहबाभ्रवीयानां॥१६॥ २१

कथयतिसुवर्णनाभोभेदानन्यांस्तुभुग्नकप्रभृतीन्॥ऊर्ध्वपुरूनार्यभिवतश्चेद्भुग्नकंभवति

धा ॥१७॥ऊर्ध्वाचरणावस्याःऊर्ध्वाचेत्तांतुराधयेत्तरुणः॥हृत्यंलग्नौकथितंजृंभितकाद्यैस्तथा=

शाद्यैः॥१८॥इदमेकस्मिंश्चरणेविततेस्यादर्थपीडितंप्रथया॥ऊर्ध्वंसगतेहेकस्मिंसारितमिद=

मेवनिर्दिष्टं॥१९॥व्यत्यासेमुहुरिदमिहलक्षणातोवेणुदारितंकथितं॥मूलावितकंशीर्षेयच=

य्येकंस्यात्सरंधरात्प्रसृतं॥२०॥आभ्यासिकमिदमुक्तंयदितुपदेविकुंचितेश्चवस्ति॥प्रोक्तंतत्क्षु

कीटकम्रोर्वोर्घोर्व्यत्ययेपीडा॥२१॥जंघायाव्यत्यासेपद्मासनमिहनिरूच्यतेविबुधैः॥पृष्ठस्थ

चंद्रमुख्याआरचपंत्याःपरिष्वंगं॥२२॥अभ्यासादिदमुक्तंकामागमपारगामिभिर्विबुधैः॥

निर्मध्यकामशास्त्रं परं ऽमुखसे परावृत्तं ॥२३॥ उपविष्टस्सं विष्टः स्थितिमानथवा जलस्य पुरु
षोत्तः ॥ साभ्यासस्याद्यत्नाद्वित्रान्योगांस्तथालभते ॥२४॥ कथयति सुवर्णनाभः सुकरतया तेक
२२ चित्स्वयोगाणां ॥ शिष्टैरपस्मृतत्वाद्विप्रतिवाच्यायनस्यास्य ॥२५॥ अथ कथयति सुकुमारो र
थोत्सवे चित्रं ॥ ऊर्ध्वस्थितयोर्यूनोरूर्ध्वरतं जायते तत्र ॥२६॥ अन्योन्यापाश्रितयोर्यदि वा कु
ड्यादिसंश्रितहेन ॥ स्मरशरनिहतहृदोरिह कथयंत्यूर्ध्वरतं विबुधाः ॥२७॥ कुड्या• श्रितस्य पुं
सः कंठे संसक्तबाहुपाशायाः ॥ तद्भुजपंजरगायाः तज्जघनं वेष्टयंत्याश्च ॥२८॥ ऊरुभ्यामथ
कुड्ये चलत्याश्चरणविक्रमेणास्याः ॥ स्यादवलंबिकं रतमथ धेनुकमेतदाम्नातं ॥२९॥ हस्तली
लावस्कंदनमधिधरणिधृतेश्च तुष्पदन्यायात् ॥ तत्र रते खलु पूनोः पृष्ठमुरः कर्मसंलभते ॥३०॥
रीत्यानयैव शौचं छागलमैणेयगर्दभाक्रांते ॥ मार्जारक्रीडितकं व्याघ्रवस्कंदनं चैव ॥३१॥ दत्ताव
लोपमर्हितमथ सूकरवाजिपृष्ठकारूढे ॥ लक्षणमेषां कार्यं तत्र त्यापूर्ववैधर्म्यात् ॥३२॥ संघाय

करतमुक्तं द्वाभ्यामाभ्यां सहैव मिश्राभ्यां ॥ बह्वीभिर्गोयूथिकमुक्तं स्त्रीक्रीडितं चैतत् ॥३३॥ वि
ज्ञेयाः स्मरशास्त्रेत कर्मानुकारसंयोगात् ॥ संज्ञाभेदास्त्वेते छागलमैणेयमित्याद्याः ॥३४॥ वि
षयविशेषे राज्ये युवतीनां स्त्रीसमानता पुंसां ॥ तस्मादेकैकस्या बहवो विदिता युवानस्ते ॥३
ते तामेवैकं वा युगपद्वा सात्म्ययोगयोर्द्व्याः ॥ अनुरंजयेयुरुचितं तत्र च योगः प्रदर्श्यते विविधः
॥३६॥ बिभृयादेनामन्यः कुर्यादस्या निषेवणं चान्यः ॥ एको वदनं जघनं कश्चिन्मध्येऽपरः पुरुषः ॥
॥३७॥ इति वारंवारं चाप्यति करतो वापि साधुचेष्टरन् ॥ एषा देशविशेषे नीतिः कथिता न सर्वत्र ॥३८॥
एतेन व्याख्याता वेश्या गोष्ठीपरिग्रहीभूता ॥ तद्वद्राजस्त्रीणां व्याख्याता तत्समासेन ॥३९॥ द
क्षिणदेशे घोरतमुपदिष्टं भूरिजा यथाप्युचितं इति वात्स्यायनरीत्या चित्ररते वीरभद्रोक्तिः ॥४०॥
पुरुषायितकं वाच्यं सम्यक्पुरुषोपसृष्टकं भूरि ॥ वात्स्यायनप्रतिज्ञामनुस्मृत्ये स्वोचितास्यापि ॥४१॥
पशुमृगपंजिविलासैर्बहुभिरुपायैः प्रबोधवीक्षित्रे ॥ रतियोगानतियोगाद्विवर्धये कामतन्त्रज्ञः

© Dharmartha Trust J&K. Digitized by eGangotri

॥४२॥ न साम्योदथ सा स्याद्दृशानां भूरिभावयोगेन॥ स्त्रीणां स्नेहो वा गो बहुमानो जायतेनुपमः
॥४३॥ श्रीवीरभद्रकृतिना शास्त्रेऽसमबाणशासनानुसृते॥ सांयोगिकेधिकरणे षष्ठोध्यायः कृतः
२३ षष्ठः॥४४॥ ॥ अथ सप्तमध्यायं व्याख्यातपौरुषो जगति॥ श्रीवीरभद्रनामा निर्जितकामाकृ-
तिः कांत्या॥१॥ कलहस्वरूपमाहुः सुरतं कामस्य वामशीलत्वात्॥ तस्य विशदं तथापि च तस्माद
23 त्र प्रहारोस्ति॥२॥ अंसौ पृष्ठं स्तनयो रंतर्मूर्धा तस्य च हारः॥ भेदाः सीत्कृतमस्मादार्तितया भूरिभेदं
च॥३॥ विरुतं च तत्र सीत्कृतमष्टविधं स्याधिहिंकृतप्रभृति॥ स्तनितं कूजितरुदिते फूत्कृतहूत्कृतहूंका
रकौ तद्वत्॥४॥ सूत्कृतफूत्कृत [redacted] के अपि मोक्षार्थाये च विश्रुताः शब्दाः॥ एते सीत्कृतिपेक्षा
अलमंबावारणार्थाश्च॥५॥ अर्थविशेषादेतान् हिंकृतकादीन् प्रयोजयेद्विद्वान्॥ वात्स्यायनानि
रुक्तो विस्तारो नादृतोऽनेन॥६॥ पारावतापरभृतशुकमधुकरहारितहंसदात्यूहाः॥ अनुकर्त्तव्य
नुताः हल्लावककारंडवौ चैव॥७॥ एवं च चक्रवाकः सीत्कृतमूइष्टमीदृशा वशाद्वोः॥ एकैकशः प्रयो
ज्याः कामाकुलया नितंबिन्या॥८॥ पृष्ठमुष्टिभिघातः क्रोडगतायाः प्रफुल्लपद्माक्ष्याः॥ तत्र स्तनि

तत्प्रभृति च कुर्यादीत्साम्यसूयेव ॥९॥ प्रतिघातान्कुर्यादपि कुर्याद्योजितयंत्रां स्तनांतरे हन्यात् ॥ अ-
पहस्तअपहस्तकेन मंदप्रारंभे वर्धमानश्च ॥१०॥ आरागपरिसमाप्तेर्हिंकारादीन्प्रयोजयेन्न
स्य विकल्पाभ्यासोऽकथितो तेषां प्रयोगस्य ॥११॥ विवदत्यासीत्प्रहणनमिह कुंचितांगुलिकरेण ॥
शिरसि प्रसृतकमाहुः निश्चितकामागमाः पुरुषाः ॥१२॥ अंतर्मुखेन कुर्यात्तत्र च फूत्कारकूजिते यत्न-
तः ॥ रतकर्मणोऽवसाने श्वसितं रुदितं विदध्याच्च ॥१३॥ स्फुरतो वेणोरंतु रुतिरुक्ता शद्धहूहूकूलिः शाद्धे ॥
सूत्कृतिरिह विनिपतितः पानीये पिप्पलस्योक्ता ॥१४॥ अभ्यासे प्रहतेरिह सर्वत्र चुंबने नादः प्रारंभे
स्यात्तसीत्कृतेः करणात् ॥ तेनैव प्रत्युत्तरमुक्तं मागप्रभावेन ॥१५॥ अभ्यासे प्रहतेरिह शब्दावार-
णमोक्षार्थं बाधार्थः ॥ वक्त्व्यारति विरतोऽश्वसिताद्युन्मिश्रितो योगः ॥१६॥ विरुतान्नाम पित-
द्धद्वागावसितिक्षणोऽहनामिहतिः ॥ जघनस्य पार्श्वयोर्वा समतलकं स्यादिहाघातं ॥१७॥
तत्र च लावकपरभृतहंसानां कूजितोदरस्वरया ॥ इति समतलप्रहणने योगायोगाः प्रहार

२४ स्य॥१८॥पारुष्यंरमससंतेजश्चैवेहशोभते पुंसां॥आरल वदेशक्ति व्यावृत्तिर्योषितांभाति॥१९

24 रागात्सयोगसाम्याद्भवतिव्यत्यासएतयोः क्वापि॥अचिरंप्रालंतस्य प्रकृतिर्भवतीतिशास्त्रार्थः

॥२०॥कीलाकर्त्तरिकोद्वेविध्यासंदंशिकातथैवान्ये॥प्रहणनमष्टकमित्थंसहपूर्वैर्दाक्षिणात्या

नां॥२१॥विध्याकपोलदेशेकीलोरसिकर्त्तरिश्शिरोदेशे॥संदंशिकाचकुचयोःपार्श्वेदितयेवसंदि

ष्टा॥२२॥कीलान्युरसिमृगीदृशांदृश्यंतेदाक्षिणात्यदेशानां॥देशविशेषादुक्तमिदमम वास्या

यनस्येह॥२३॥देशांतरीयमन्यच्चैवदेशांतरेमनोहारि॥तद्देशेप्यात्ययकंपरिहर्त्तव्यंप्रयत्नेन॥२४

गणिकांकांचिद्धतवान्कश्चिद्राजाहिकीलयासुरतं॥राज्ञेमन्योभूपः कर्त्तर्यादुष्टयोगेन॥२५॥

यद्विद्वयायोगात्काणांवक्रेनटीकिल्लेहान्यः॥तास्मादसावधानःप्रहणनयोगैन्नकुर्वीत॥२६॥

अंतेनगणिकामूलंनापिवदार्द्धनशास्त्रताभ्यासः॥उक्तेनतिसमरेरागात्संजायतेयूनोः॥

॥२७॥स्वप्नेष्वपिचनरसिकैरीक्ष्यंतेभावविभ्रमौतौहि॥कामिन्यांतक्षणमिहयौस्यातांकल्पितौसुर

ते॥२८॥आसाद्यपंचमीमिहपथितांथारांनेक्षतेयथातुरगः॥वेगांधःश्वभ्रदरीस्थाणुंचान्यत्तथाविप

मं॥२९॥एवं रतिसंमर्दे रगातौ कामशासनानुगतौ॥ असमीक्ष्यात्ययमेतौ जायेते चंडवेगौ द्वौ॥३०॥
तस्माग्द्याद्याम्रदुतां बलचंडसेवसानसाक्षीणां॥ बलमात्मनश्च योगाद्युंजीत ध्यानशास्त्रार्थः
॥३१॥ सर्वासु सर्वदा न हि योगास्सांयोगिका बुधैर्देयाः॥ स्थाने देशे काले समुचितएषां प्रयो
गस्स्यात्॥३२॥ श्रीवीरभद्रदृष्टिना शास्त्रे समबाणशासनानुसृते॥ सांयोगिकेधिकरणे स
समइह निश्चितोध्यायः॥३३॥ अथ रचयति पुष्टार्थं तस्याष्टममेवमादरोध्यायं॥ यस्य[illegible]द
रादरिसुदृशः शैलश्रीमाश्रिता आरात्॥ रत्यभ्यासभ्रांते कांते रागाधिके कृतार्थिहे॥ अवयात्यै
नं रचयेत्पुरुषायितमेणशावाक्षी॥२॥ यदि वा स्वाभिप्रायात् अर्थितया शिल्पकल्पनासीमः॥ न
यक कुतूहलाद्वा कलयेद्वलात्कवन्हापुंसः॥३॥ तत्रैतरेणयुक्तेयं वेक्रियते यदोर्ध्वे लिखस्याः॥
अवपातये तदैनं स्यादेवं रतविच्छेदः॥४॥ इत्थमनल्पगुणोयं प्रथमः कल्पस्त्रियाश्रि
ते पुंस्त्वे॥ भवति परस्तु जघन्यो यंत्रगे समारंभे॥५॥ भ्रस्यक्रे रागकुसुमास्वासाद्विखि

न्नहासलीला च। चुंबितुमस्यमुखेंदुं वक्षोजाभ्यां प्रविश्य मोरः॥६॥ संपीडयंत्यनुकलं
नमयंतीमस्तकं कृतश्लेषाः॥ पूर्वं पुंसा रचये दीर्घ्या कलुषेव मृदंगी॥७॥ प्रतियातया
२५ भिपूर्वं भवताहं पातिता महायत्नात्॥ इति रमके प्रहसंती ब्रूयास्स्वांतर्जयंतीव॥८॥ न
मध्ये मध्ये क्रीडां श्रममभिरामातया चिराज्येष्ठां॥ संदर्शयेन्मुखश्री निर्जितराकेंदु शो
मैषा॥९॥ पुरुषोपसृष्टके रथमुदु रूपसपैतता निवक्ष्यामः॥ पुरुषश्शयनगतायाः नीवी
विश्लेषयेत्सुदृशः॥१०॥ कुर्यादितत्तस्यां किंचिद्व्याक्षिप्य भूरिभिर्वचनैः॥ एवं नीवी
मोक्षे यूनो रागोधिको भवति॥११॥ तत्रविवादे तामथ गंडे परिचुंब्य राकुली कुर्या
त्॥ परिसंस्पृशेच्च बहुधास्थिरलिंगस्तत्र तत्रैतां॥१२॥ प्रथमं तु संगता चेद्द्वौ रिह
सन्नतिं स्फुटीभवतोः॥ रचयेद्घट्टनमंतः कन्यायाश्चैवमातनुयात्॥१३॥ स्तन

योरथ संहतयोस्सकृच्छास्तनयोर्ग्रहे चांसे स्वैरित्यारचयेदिति सा स्त्र्यं योगं पुरस्सृत्य
॥१४॥ अलके निर्दयमेनामवलंबेताथ चुंबनं कर्तुं॥ अंगुष्ठि संपुटकेन वहतु देत्रौष्ठप्रस्फु
रन्मर्दनात्॥१५॥ तत्रैडरासलज्जारचयेदामीलनं दृशोस्युमुखी॥ प्रथमसमागमसमये रति
संयोगे च कन्यायाः॥१६॥ एवाकथमनुक्तास्यादिति कुर्याल्लवृत्तितो वीक्षां॥ उपसर्पन्युत यंत्रो
यत्रैवाप्रापयेदृष्टिं॥१७॥ व्रीडां तस्यास्तत्र च नुयादेत द्रहस्यमेणाक्ष्याः॥ आह च सुवर्णनाभः
कामागममार्गमाश्रित्य॥१८॥ व्रीडानाशः स्रस्तिर्गात्राणां मीलनोदयश्च दृशोः॥ इति रत्यका
ङ्क्षया भावोदयलक्षणं स्त्रीणां॥१९॥ कंपो दशनं स्वेदः करपंकजयोर्विधूननं खेदः॥ उत्थानात्प
णमधनिहतिश्च रशनां बुजाभ्यां च॥२०॥ अतिहृत्तिरतिविरेतो पुंसे तु दयेस्य लक्षणान्याहुः॥
कामागमपरिशीलन चंचुरद्धिात्रा युवानस्तु॥२१॥ एनां यंत्रावसरात्पूर्वं संबाधहस्तिनास
दशाः॥ आमृदुमावाक्षु ब्धां रचयेत्करपंकजेतासौ॥२२॥ पश्चाद्रचयेदनया यंत्रयंत्रादयं त्रि

२६ कितस्मृतिभूः॥ पुरुषोपसृप्तकानि च कथयामो विस्तरादधुना॥२३॥ उपसृप्तकमथनकु
लमर्दनपीडवानिर्हतिस्तद्वत्॥ सूकरघपानिर्घातौ चटकविलासस्तथैकद्वयः॥२४॥ संपुटसहि
तः प्रोक्तो वात्स्यायनसारसंसृष्टौ॥ लक्षणमेषां क्रमशः कथयामस्तु सुखबोधाय॥२५॥ न्या
य्यं मृदु संमिश्रणमुपसृप्तकमत्र कामिभिः कथितं॥ भ्रामणमथ हस्तेन च मंथनमिह हस्तवृतोः
लैंगं॥२६॥ नीचीकृत्य जघनमथ तदुपरि संघट्टयेद्ध्वजं हृल्ले॥ उच्चैस्तरभसमिदमवमर्दनमि
ति संज्ञयासमाम्नातं॥२७॥ आहत्य ध्वजतश्चिरमवतिष्ठेद्रीडयन्यदा पुरुषः॥ पीडितकं
तदिहोक्तं शास्त्रज्ञैरर्थयोगेन॥२८॥ उत्कृष्य स्वं जघनं दूराद्वेगेन पातयेद्यदा॥ निर्घातोसौ थितो क
मुनिना निर्घातयोगेन॥२९॥ एकत इह भूइष्टं लिखैवनेकथितो वराहघातोसौ॥ उभयत्र क्रमल्लि
खने रघघातः कामिभिर्ज्ञेयः॥३०॥ वारइकं संमिश्रितमनीसार्यैतत्समंतदेशेषु॥ द्वित्रिश्च तुरि
तिघट्टनमुदितं वरकस्य लीलेयं॥३१॥ व्याख्यातं करणं सिहरागादसितौ तु संपुटख्यात्या॥

तेषां सात्म्यादिह युक्तो योगो विकल्पेन ॥३२॥ पुरुषायुते यितेधिकानि तु कथितान्यन्या
निसंज्ञया त्रीणि ॥ संदंशभ्रामरकौ प्रेंखोलितमुल्लसत्कामं ॥३३॥ बाडवकेन गृहीतानि ष्कर्षसाः
प्रपीडयंत्या वा ॥ सुचिरं स्थानं प्रोक्तं संदंशेन शास्त्रेषु ॥३४॥ यत्राभ्यासाधिक्याच्चक्रे भ्रमणं गृहीत
यंत्रायाः ॥ तमिह भ्रमरकमाहुर्जघनो त्र पुंसस्तु ॥३५॥ दोलावज्जघनस्य प्रेंखोलित-
मुच्यते मितो भ्रमणे ॥ लक्षितमेवं त्रितयं वात्स्यायनभाषिते नेह ॥३६॥ स्वलिकेलिकनिधायस्वि
पंरमणस्य युक्त यंत्रैव ॥ पुरुषायितेन खिन्ना विश्रामं प्राप्नुयादुचितं ॥३७॥ पुरुषस्यावर्तनमिह नरु
चितं स्त्रिया विश्रमे जाते ॥ इति पुयित रूपं कथितं मुनिना विविच्यैव ॥३८॥ प्रच्छादित स्वभावात
द्वहेलपरिगूढरागसंभारा ॥ विरमोति हंभा गं रागादुपरि स्थिता पूनः ॥३९॥ शीलं रतिलोलसतां
तद्वेनास्यास्तदीयचेष्टाभिः ॥ जानीयादनुरक्तस्तस्यां स्यादानुकूल्पेन ॥४०॥ पुरुषायितेन ना

२८ रीमृतुकालीनांनवप्रजातांच॥नमृगींगर्भवतींवानातिस्थूलांयुतांकुर्यात्॥४९॥श्रीवीरभद्रहू=
तिनाशास्त्रेसमवाप्यशासनानुस्मृते॥सांप्रयोगिकेऽधिकरणेस्त्रष्टोभूद्दृष्टमोध्यायः॥५०॥नव
मेनवमंकुरुतेध्यायंसांप्रयोगिकेधुनावीरः॥अधिगम्यपेनसमरंनीवीरोवेरिवगोभूत्॥१॥प्रह्
तिर्द्विधातुतीयास्त्रीपुंभेदेनतत्रपूर्वात्॥वेघालापोयानंलीलांभावंचभीस्वन्न॥२॥मृदुतासुरवि
ताक्रीडास्त्रीणमनुयातिचासहिष्णुत्वं॥पदनेस्याज्जघनस्थितिशालिर्वास्यायनःप्राह॥३॥
प्रथमोपरिष्टकंखलुप्रथमेचेष्टाततोधिकारतिं॥स्त्रीकूलवेश्याचःतात्रतिमभिमानाद्ब्रजभ्येषा
॥४॥अन्यापुरुषाकृतिरिहगुप्तागाप्रियंभजयुक्ता॥संवाहकादिभावंदर्शानैवप्रकाशंतु॥५॥गत्वा
संवाहकृतांगात्रेरूरूपरिष्वजन्नस्या॥गृह्णीयात्सरिचयमूरूर्वोर्मूलंस्पृशंतीच॥६॥उपलभ्यध्वज
धैर्यमधीयान्वाप्तिनादृढंबहुधा॥चापलमस्यसकुसंग्रहसेदनुपक्रमेप्येवं॥७॥स्वयमारचये=
दुद्यममुद्युक्तेस्मिन्निवादशालेषा॥उपगच्छेत्कुछादिहकर्मात्रिष्टकमत्रनिर्दिष्टं॥८॥अविकल्प

तः प्रयोज्यं निमित्तं दष्टं च पार्श्वतस्तद्वत् ॥ संदंशौ बहिरंतर चुंबितपरिमृष्टके चैव ॥९॥ आ आवपूषितं
ननु संसरइति तेषु चेयमेकैकं ॥ अभ्युपगम्य विरामे भीक्ष्णं संदर्शयेत्तस्य ॥१०॥ इतरः पूर्वोपगमात्सरतो
निर्वेशमाचरेत्सरतः ॥ तस्मिं सिध्येतदुपरमितिनीतिः क्रमेणामेषां ॥११॥ ओष्ठोपरि विन्यस्ते हस्तेनालं
बितं धनेपुरुषः ॥ उपविध्यास्य धुनुयादेतन्निमित्तं मुनिः प्राह ॥१२॥ अध्याघाग्रं ~~~~ रतो निर्दशनं य
शानवसनयुग्मेन ॥ दृष्टं पार्श्वतद्दृष्टं पीडायां पार्श्वतस्त्वास्ये ॥१३॥ अत्र भवहेतावसांहनमिति कामिनो
मुदेभिमतं ॥ भूयोपि तोदितासौ संमीलितदशनवस्त्राचेत् ॥१४॥ संपीड्याग्रेन तस्य च मुंचेदंशौ बहिर्म
वे कुष्ठौ ॥ तस्मिन्नभ्यर्थनया यदि किंचित्प्रक्षिपेदधिकं ॥१५॥ अग्रौष्ठाभ्यामियमथ चरितनिहृत्तिर्यया
बहिः कुरुते ॥ अंतस्संदंशो सौ वात्स्यायनभाषिपिते नेह ॥१६॥ हस्तावलंबितस्य च चुंबितकं दत्तवस्त्रवद्ग्र
हणे ॥ परिमृष्टकमिदमुक्तं तत्कुर्याज्जिह्वयाग्रेण ॥१७॥ घट्टनमथितो ग्रेण च तध्यनं नागभारसंयोगा
त् ॥ अर्थप्रविष्टमीदृग्दशनसंगापुरस्कारात् ॥१८॥ मुहुरवपीड्य विमुंचेन्निगदितमिदमाम्रचूषितं श

स्वैपुरुषाभिप्रायवशादवगिरणंपीडनं चांतं॥१९॥उक्तस्तं मरनामाप्रहणनयोगादिहार्थतोज्ञेयाः॥वा
त्स्यायनानुसारिविधिरयमत्रोपरिष्टके कथितः॥२०॥स्वैरिण्योदास्यो वाकुलटास्तं चाहीकास्तथाचेत
त्॥सम्यक्प्रयोजयंतिनकार्यंसमयस्थितेरेतत्॥२१॥अपिवासहयतयासांपुनरपिवदनांबुजस्यसंस
